
भाद्रपदमासः
वर्षम्–६७
एकादशोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ सितम्बर २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



त्रिशूली वरदश्चैव सर्वविघ्नविनाशकः।
सम्भूय राष्ट्रसेवायै गणेशः प्रेरयेज्जनान्॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | ''शकुन्तलायाः प्रियंवदा-अनसूये हृद्ये'' | पं. सुरेश कुमार शर्मा | ७ |
| ५ | पदमातृकाविज्ञानम् | प्रस्तोता -डा. सुरेन्द्र कुमार शर्मा | ८ |
| ६ | रामानन्ददर्शने भक्तिस्वरूपम् | श्रीमती अंजना शर्मा | ९ |
| ७ | संसारसारभूतं ननु भारतं मदीयम् | पं. साँवरमल शास्त्री | १० |
| ८ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | ११ |
| ९ | अद्वैतं सुखदुःखयोः ( स्मृतिकथा ) | डॉ. हर्षदेवमाधवः | १४ |
| १० | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १५ |
| ११ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १६ |
| १२ | श्रीसुभाषचरितम् महाकाव्ये अलंकार-योजना | प्रो. अर्चना दुबे | १७ |
| १३ | बीजमन्त्राणामर्थः महत्त्वमौचित्यञ्च | रजनीश कुमार बारहठः | २१ |
| १४ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २४ |
| १५ | अश्वघोषस्य महाकाव्येषु जीवन-मूल्यानि | विश्नोईभंवरलालः | २५ |
| १६ | संस्कृतदिवससमारोहः 17.08.2016-वृत्तलेखः | रामानुज पांडेयः | २९ |
| १७ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३१ |
| १८ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

भाद्रे मास्यसिते दलेऽतितमसा व्याप्ते नभोमण्डले,
जातो यो मथुरापुरे नरपतेः कंसस्य कारागृहे।
नीत्वा स्वं वसुदेव एव तनयं सद्योऽगमद् गोकुले,
तं वन्दे जगतो गुरुं नटवरं गोपीजनाराधितम्।।

## मासावतरणम्

मासे भाद्रपदे सदैव जलदा मुञ्चन्ति भूमौ जलम्,
वर्षावारिषु शीघ्रमेव मुदिताः क्रीडन्ति वर्षाभुवः।
आसारेषु जलं पिबन्ति पशवो वृष्ट्याधुना ये भृताः,
कासारा जलसंभृताश्च परितः शोभां लभन्ते पराम्।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

भाद्रपदमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
सितम्बर, 2016
अङ्कः - 11
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

## सम्पादकीयम्

# जीएसटी नियमेन करप्रणाली सरला संजाता

...✍ पं. प्यारेमोहनशर्मा

संसदि राज्यसभायामैतिहासिकं समानसेवाकर-विधेयकं पारितम्। पञ्चविंशतिवर्षेभ्य: पूर्वमार्थिकोदारी-करणानन्तरं स्वीकृतोऽयं सर्वेभ्य: सुधारकार्येभ्य: बृहत्तर आर्थिक: सुधार इति कृत्वा स्वागतयोग्यो विद्यते। ततश्च लोकसभायामपि निर्विरोधरूपेण विधेयकमिदं पारितम्। भारतीयसंविधाने जातस्य 122 द्वाविंशाधिकशतमस्यास्य संशोधनस्य समाचारपत्रैरपि पूर्णरूपेण स्वागतं विहितम्। लोकसभायामपि नासीदेतादृश: कोऽपि सदस्य: यो हि विरोधे मतं व्यक्तीकृतवान्। अस्मिन् विभिन्नै राजनैतिकदलै: राज्यसर्वकारैश्च जीएसटीपक्षे ये प्रयत्ना: कृता: तेषां गाम्भीर्यं गौणं संजातम्। राज्य-सभायामैतिहासिकघटनात: पूर्वं षोडशवर्षपर्यन्तं चत्वार: सर्वकारा: षट् वित्तमन्त्रिण: राज्यसर्वकाराणां वित्तमन्त्रिणश्च बहु परिश्रमं चक्रु: जीएसटी कर प्रणाली संरचनायां नैकवारं पुनर्लेखनं जातम्।

रहस्यमेकमत्र सदैव स्थास्यति यद् भारतेन आङ्गलानां शासनकालिकीमार्थिकां-जटिलां कर-प्रणालीमपाकर्तुं किमिति सुदीर्घ: समय: यापित:? आर्थिकोन्नत्यां बाधिका-आसीदाङ्गलानां प्रणाली। राज्येषु संस्थापिता: अधिकारिण: कर्मचारिणश्चानेन नियमेन लाभमलभन्त। ते कर्मचारिणो नानाविधान् करान् विरच्य जनेभ्यो धनमलुण्ठन्। विभिन्नवस्तूनां गमनागमने करं निर्धार्या-नन्दमलभन्त। राज्यानां सीमासु करप्रदानाय ट्रकयानानां सुदीर्घा: पङ्क्तयश्चिरकालं (पञ्चषट् दिनानि) यावत् स्वक्रमागमनं प्रतीक्षन्ते स्म। संप्रति राजधान्यां दिल्यामेव 122 चेकपाइन्टसंस्थानानि (शुल्क-प्राप्तिपरीक्षका:) विद्यन्ते। यत्र प्रतिदिनं विंशतिसहस्राणि ट्रकयानानि नगरनिगमस्तरे प्रवेशाय सुदीर्घसमयं यापयन्ति। इत्थमेव विभिन्न-वस्तूत्पाद-कानि संस्थानानि स्ववस्तूनि भारतस्य विभिन्नराज्येषु प्रेषणयितुं करनिरीक्षकेभ्य आज्ञापत्रं प्राप्तुं विपुलं धनं व्ययीकुर्वन्ति।

जीएसटी नियमेन या: बाधा: निरस्ता: भविष्यन्ति तत्र प्रवेशशुल्कोऽपि सम्मिलितो विद्यते। एतेन भारतस्य (29) ऊनत्रिंशद् राज्येषु परिवहनकार्यं सरलं भविष्यति। भारते निवेशाय समुत्सुकानि संस्थानानि समुत्साहितानि भविष्यन्ति। लघूत्पादकान्यपि-अन्यराज्येषु सुखेन प्रवेशं लप्स्यन्ते। तानि (सुविधा शुल्क) रिश्वतप्रदानेन मुक्तिं प्राप्स्यन्ति। करनिर्धारणप्रणाली सरला भविष्यति। नरेन्द्रमोदीसर्वकारस्तदीयवित्तमन्त्रिण आर्थिक-परामर्शदातारश्चैतदर्थं धन्यवादार्हा विद्यन्ते येषां सत्-प्रयासै: सर्वेषां दलानां समर्थनं समुपलब्धम्। सर्वाणि दलानि सत्कार्यायापि न संघटितानि जायन्ते। भारतवर्षे विगतवर्षेभ्य: निम्नस्तरीयोऽयं विचार: विभिन्नदलेषु सम्प्रविष्ट: यत् सर्वकारीयदलस्य सर्वात्मना विरोध: करणीय:। परन्तु प्रधानमन्त्रिण: श्रीनरेन्द्रमहोदया एतदर्थं धन्यवादार्हा येषां सदाशयतया अन्यदलेभ्य: जी.एस.टी. नियमाय पूर्णरूपेण समर्थनं प्राप्तम्।

अधुना सर्वकारसम्मुखेऽतीव कठिनं कार्यं करणीयं विद्यते। अनुमानत: वर्षद्वयात्मक: कालो नियमस्यास्य

क्रियान्वयने लगिष्यति। राज्यसभा लोकसभा च देशे एकः समानो नियमः सम्पूर्णवस्तुषु सम्पूर्णदेशे स्यादित्यवधार्य क्रान्तिकारिणो नियमस्य (नींव) खनिमस्थापयताम्। सम्प्रति एकेन विधेयकेन सर्ववस्तुभ्यः समानकरो निर्धारितो भविष्यति। राज्यसर्वकाराणामायस्रोतांसि निरुद्धानि, अतः केन्द्रसर्वकारस्तेभ्यः पृथक् पृथग्रुपेण जी.एस.टी. नियमान्तर्गतं प्रदेयं धनभागं निर्धारयिष्यति। साधारणो जनोऽपि प्रभावितो भविष्यति अतः तदर्थमपि विचारोऽत्र करणीय एव। उभयोः सुविधां सुनिश्चित्यैव विधेयकः प्रभावितो भविष्यति।

यद्यपि नियमस्य विशाला बाधास्माभिर्लङ्घिता। अतः केन्द्रसर्वकारस्य प्रयत्नैः शीघ्रमेवायं कार्यरूपेण परिणतो भविष्यतीति वयमाशास्महे। उभयसदनेषु निर्विरोधरूपेण पारितत्वात् विशेषोर्जास्माभिर्लब्धा। एकधा वातावरणं संजातं तदा नैकानि वस्तूनि स्वत एव मूर्तरूपं गृह्णन्ति। इदं सुनिश्चितं जातम् सम्प्रति यन्मोदीसर्वकारः नियमममिमन्तिमं लक्ष्यं यावत् प्रापयिष्यति।

सम्प्रति अमेरिकायां राजनैतिकी अनिश्चितता संलक्ष्यते। संरक्षणवादिनामवरोधैः बाधाभिश्च आसन्ना क्षतिः संलक्ष्यते। प्रकीर्णामिव लक्ष्यन्ते यूरोपीयदेशाः। भारतस्य कार्यप्रणाली मन्दगत्या प्रचलेन्नाम, परन्तु मोदीसर्वकारः यद्वस्तुनो निर्माणं विदधाति सा सुदीर्घ-कालं यावत् सुस्थिरा भविष्यति। एकविंशतिशताब्द्यां राष्ट्राणां तारामण्डलमध्येऽस्माकमुचितं स्थानं भवेदिति भारतमभिलषति। अतः आर्थिकी कठिनतावसरे लब्धावसरस्य लाभमवश्यमेव भारतं लप्स्यते।

जीएसटी भारतकथायां (मीलपाषाणं) स्थिरं स्थानं विद्यते। सुनिश्चितमेव 1.30 अरब (अर्बुद) संख्याकैः भारतीयैः सोऽयमवसरः स्वर्णिमयुगमानेष्यति पौनः पुन्येन वयमेतत्कृते केन्द्रस्य मोदीसर्वकारमुभे सदने च धन्यवादानर्पयामः।

## आत्मनः उन्नतिर्विधेया

सद्भावैः सह विरचितेन संघटनेन परोपकारैः सह आत्मनः अपि उन्नतिर्जायते आत्मविश्वासश्च वर्धते। एतादृशमेवैकं संघटनं मुम्बईवास्तव्यैः प्रतिदिनं रेलयानेन यात्राकारिभिः जनैर्विनिर्मितम्। पञ्चाशद्वर्षेभ्यः पूर्वमपि मुम्बईनगरे विभिन्नकार्येषु संलग्नाः सर्वकारभृत्याः, कार्यालयकर्मचारिणः, व्यापारिणः, श्रमिकाः, धनाढ्या निर्धनाः स्वे स्वे कार्यस्थले नगरीयरेलयानेन यात्रामकार्षुः। अधुनापि तेनैव रेलयानेन विभिन्नकार्येषु संलग्नाः जनाः प्रतिदिनम् आयान्ति यान्ति च। अन्तरं केवलमिदं जातं यत्तदानीं रेलयानानि द्वित्रिवारमेव यान्ति स्म आयान्ति स्म च। अधुना जनसंख्या वृद्धिंगता कार्याण्यपि वर्धितानि अतः यानं प्रातः कालाद् रात्रिपर्यन्तं नैकवारम् आयाति याति च। एषु रेलयानेषु नियमितयात्रिणः समूहं रचयन्ति। समूहे परस्परं मनोरञ्जनमपि कुर्वन्ति। एते समूहे प्रसन्न- तामनुभवन्ति समूहकारणात् नात्र कोऽप्येभिः सह कलहं कर्तुं शक्नोति। एतेषां संघटनमतीव सुदृढं भवति। यदि कोऽपि अवकाशे गच्छति तदा संघटनमपि सूचयति आकस्मिकावकाश-ग्रहणे यथा कार्यालयं सूचयति तथैव समूहजनेभ्यः सूचनामवश्यमेव यच्छति। अतः एतेषां संघटनं तृतीयशक्तिरूपेण कार्यं करोति। प्रथमं गृहं, द्वितीयः कार्यालयः तृतीयश्च सहयात्रिसमूहः। शनैः शनैः सदस्येषु आत्मीयता वर्धते, विभिन्न-पर्वसु परस्परमामन्त्र-यन्ति। गणेशचतुर्थी-सदृशपर्वसु दर्शनाय आह्वयन्ति। यदि केनापि कारणेन कोऽपि सदस्यः चिकित्सालये प्रविष्टो जायते तदा समूहजनाः कुशलक्षेमं ज्ञातुं चिकित्सालयं गच्छन्ति समूहसदस्याः सत्यामावश्यकतायां चिकित्सायै आर्थिकीं सहायतामपि कुर्वन्ति। इदं संघटनं चिरं तिष्ठति

सेवानिवृत्यनन्तरमपि संघटनसदस्याः परस्परं समये समये मिलन्ति।

अनेन संघटनेन निरन्तरं सुस्थिरं प्रेम समारब्धम्। शनैः शनैः संघटनमिदं सामाजिकगतिविधिष्वपि भागमगृह्णात्। संघटनस्य प्रत्येकमपि सदस्याः स्वशक्त्य-नुसारमार्थिकसहयोगं संघटनाय प्रायच्छत्। अस्य सदस्या षट् सप्ताहेषु वारमेकं वृद्धाश्रमान् गच्छन्ति। वर्षे वारद्वयमादिवासिनां ग्रामान् गच्छन्ति तेषामावश्यकतां च पूरयन्ति। ग्रामाः स्वावलम्बिनः स्युः एतदर्थमप्येते यतन्ते। आदिवासिबालिकानामाश्रमेषु वर्षे वारद्वयं गच्छन्ति। तत्रापि तासामावश्यकतां पूरयन्ति। शौचालयनिर्माणमपि कारयन्ति। सर्वे सदस्या ये धनाढ्याः सन्ति तेऽपि द्वितीयश्रेण्यामेव यात्रां कुर्वन्ति। एते धनिनः सदस्यः स्वस्मै न्यूनं धनं व्ययी-कुर्वन्ति। परन्तु अन्येषां सहायतायै विपुलं धनं यच्छन्ति। एभिः सह वार्तया ये कोट्यधीशाः सन्ति तेऽपि आत्मनोऽपेक्षया एतानधिकं सम्मानयन्ति। वस्तुतः एतादृशानि संघटनानि रचितव्यानि एभिरेव समाजे समरसता समायाति आत्मनश्चोन्नतिर्जायते।

## वर्षाकालः

वर्षेऽस्मिन् सम्पूर्णभारते वृष्टिरपेक्षातोऽधिका संजाता। इन्द्रदेवोऽतिप्रसन्नो वर्तते। जलाशयाः पूर्णरूपेण जलमग्नाः। अधिकवृष्ट्या (बाढ) प्रचण्डजलप्रवाहेण नैके ग्रामाः जले निमग्नाः संजाताः। महाराष्ट्रमध्यप्रदेश-राजस्थान उत्तरप्रदेशेषु तटवर्तिराज्येषु प्रचण्डवृष्ट्या जनजीवनमस्तव्यस्तं संजातम्। यद्यपि वृष्टिः कृषकेभ्यः क्षेत्रेभ्यश्च वरदानस्वरूपेव विद्यते। परन्त्वपरतः सर्वकाराणां दोषानप्युद्घाटंयति। वर्षागमनात् पूर्वं सर्वकाराः घोषयन्ति यत् वर्षागमनात् पूर्वमेव (पुल) कृत्रिमयातायातसाधनानां मार्जनं (मरम्मत) भविष्यति। राजमार्गाः (सडकें) श्रेष्ठाः दृढाश्च विधास्यन्ते। भूजलस्य पेयजलस्य च संग्रहणाय बन्धानां मार्गेभ्यः अतिक्रमणानि विनाशयिष्यन्ते। परन्तु सर्वमिदं घोषणापत्रेषु सन्निहितं जायते। जनता विध्वंसं सहते। बहुधनेन निर्मिताः संपदो नश्यन्ति। उदाहरणमेकं पश्यन्तु। रायगढे सावित्री-सरितोपरि निर्मितं पुलं विध्वंसितम्। नैकानि वाहनानि प्रवाहे जले निमज्जितानि। शतं जना विलुप्ताः। जयपुरे सामान्यवृष्ट्यैव पुलं ध्वस्तम्। बंगलूरनगरे मेट्रोयानस्य निम्नभागे निर्मितराजमार्गे पञ्चदशफुटमानात्मकं गर्तं सञ्जातम्। नगरेषु राजमार्गः एतादृशाः क्षीणाः सन्ति यत् स्वल्पवृष्ट्यैव वाहनानि जलमग्नानि जायन्ते। प्रत्यब्दं सहस्रशः कोटिरूप्यकाणा- मापदप्रबन्धकोषः संस्थाप्यते। संसाधनानि क्रीणन्ति सर्वकाराः। परन्तु न जाने समायाते समये सर्वाणि संसाधनानि कुत्र विलीनानि जायन्ते? उत्तराखण्डे चतुर्धाम्नां यात्रा प्रतिवर्षं मईमासतः अक्टूबरमासपर्यन्तं भवति। पुनरपि किमिति यात्रा सुकरा (सुगमा) न विधीयते । अत्र किं कारणम्? सर्वकारीय-योजनायामेव न्यूनता ? उत नेतृत्वस्येच्छाशक्तेरभावः ? अथवा भ्रष्टाचारः? एतानि एव त्रीणि कारणानि विद्यन्ते यैः प्रसन्नो वर्षाकालः प्रसन्नतां विहाय दुःखप्रदो जायते मन्त्रिणः नेतारः पण्डिताश्च सातत्येन कथयन्ति यदस्मिन् वर्षे प्रचुरमात्रायां वृष्टिरायास्याति। उत्पादनं वर्धिष्यते महर्घता न्यूनतां यास्यति। एतेन देशस्य सकलोत्पाद-नमष्टप्रतिशतमधिकं भविष्यति। परन्तु सर्वं विपरीतं जातम्। महार्घता वृद्धिंगता क्षेत्राणि च जले निमग्नानि। अतिवृष्ट्या भूमौ कर्तनानि संजातानि। उत्पादिका मृत् (मिट्टी) प्रवाहे गता। एतेनाग्रिमोत्पादनानि प्रभावितानि भविष्यन्ति। यदि सर्वकारः वर्षाकालात् पूर्वमेव सत्यनिष्ठया सर्वां व्यवस्थां सुचारुरूपेण कुर्यात् तदा प्रकृतेः इदं जलं वरदानमेव सेत्स्यति नत्वभिशापो भविष्यति।

# ''शकुन्तलायाः प्रियंवदा-अनसूये हृद्ये''

❑ पं. सुरेश कुमार शर्मा

यदा कवि-जगति विश्वस्मिन् विश्वे
एकमेव शैक्सपीयर नाम आसीत्।।

सर्वे पाश्चात्याः मन्त्रमुग्धतामधिजाताः।
कविताकमिनीं पश्यन् पश्यन् एकएव कविः
दृष्टिपथे तेषां सर्वेषामायातः।।

शैक्सपीयरः इति ख्यातः।
मैकालेसदृशाः कुटिलहृदया अपि
अस्माकं देशे आयाताः।।

भारत विरोधिनी नीतिः तेषां विश्वविख्याता।
वेदानजापालकानां कृतिं जल्पन्ति स्म।।

उच्चस्तरीयं वेदानां पाठं श्रुत्वा हसन्ति स्म।
परिहासेन तैरांग्लैः संस्कृताध्ययनं कृतम्।।

तेनाध्ययनेन कर्णकीटः तेषां भूमौ पतितः।
वेदानामुच्चादर्शतासम्मुखे ते पतिताः।।

एकस्य शब्दस्याग्रे ते आंग्लाः हताः हताः।
पठन्तः पठन्तः ते साहित्यक्षेत्रे आयाताः।।

यत्र कालिदासभवभूतिबाणकविविख्याताः।
मूर्धन्यानामेतेषां रचनाभिः चमत्कृतस्ते सञ्जाताः।।

शैक्सपीयरं विहाय कालिदासशौर्यं स्मृतिपटले आयातम्।
प्रकृतिचित्रणं वीक्ष्याङ्गुल्यः मुखस्य मध्ये सञ्जाताः।।

धन्यो हे कालिदास भवान् अस्माकमपि मस्तिष्के आयातः।

शकुन्तलायाः रमणीयत्वं विश्वजनीनम्।
नवनवतत्त्वानां प्राप्तिर्भवति यावज्जीवम्।।

कण्वऋषेराश्रमस्य शोभा मनोहारिणी।
समागतस्य दुष्यन्तस्याह्लादकारिणी।।

स्त्रीपात्राणां नाट्यवैभवमतिप्रसिद्धम्।
सिद्धोदकं ददाति गौतमी अतिशान्त्यर्थम्।।

शकुन्तलायाः प्रियम्वदा-अनसूये हृद्ये।
कण्वदुहित्र्यै साक्षात् फलसिद्धिमिव ते।।

पातुं न प्रथमं व्यवस्यति जलमित्यस्याः ख्यातिः।
सम्पूर्णे विश्वेऽस्मिन् आभ्याम् अस्याः ख्यातिः।।

कण्वाश्रमस्य सर्वा क्रिया सुसिद्धा आभिः।
स्थले स्थले गीयन्ते गीतानि बालाभिः।।

ललनाभावे सदा अपूर्णा सर्वाः सृष्टिः।
तद्वद्भवेत् शकुन्तलाया अपि संसृष्टिः।।

वैशिष्ट्यैरासां विश्वः चमत्कृतोऽस्ति।
शकुन्तले ! हे शकुन्तले मुहुः मुहुरुच्चरति।।

न शाकुन्तलस्य अनुवादो यत्र ईदृशी विश्वे भाषा नास्ति।
शाकुन्तलं वर्णितं नैव ईदृशः कविरपि अद्य नास्ति।।

कविकुलगुरुं नौमि कविकालिदासम्।
वागर्थाविवा सम्पृक्तं कविनाट्यविलासम्।।

प्राचार्यचरः
राज. संस्कृतकॉलेज, श्रीमाधोपुरम् (सीकर)

**श्री दादू आचार्यसंस्कृतमहाविद्यालयस्य पूर्वप्राचार्यैः न्याय-साहित्याचार्यैः स्व. श्री बलरामस्वामिभिः कृतं संस्कृत-संस्तवनम् -**

# पदमातृकाविज्ञानम्

❑ प्रस्तोता -डा. सुरेन्द्र कुमार शर्मा

माहेश्वरी प्रचलिता संस्कृते वर्णमातृका।
यां वै पाणिनये पूर्वं सूत्रैः प्रोवाच शङ्करः॥१॥

१. अइउण्, २. ऋलृक् ३. एओङ् ४. ऐऔच्
५. हयवरट्, ६. लण् ७. ञमङणनम् ८. झभ
ञ् ९. घढधष् १०. जबगडदश् ११. खफछठ
थचटतव् १२. कपय् १३. शषसर् १४. हल्

माहेश्वराणि सूत्राणि तानीमानि चतुर्दश।
पाणिनिर्निजशास्त्रस्य मूलान्येतान्युवाच ह॥३॥

भाषाव्युत्पत्तिसिद्ध्यर्थं तपस्यामास्थितं मुनिम्।
डमरूनादनेनैव शिवः सूत्राण्युवाच ह॥४॥

एषु संस्कृतभाषाया वर्णमालोपदेशिता।
यस्यामायतते सर्वः पाणिनेः शास्त्रविस्तरः॥५॥

माहेश्वराणामेतेषां सूत्राणामन्तिमान्तिमाः।
हल् वर्णास्तु ये वै ते इतः पाणिनिना मताः॥६॥

सूत्रोक्तानां हि वर्णानां गणनावसरे त्विमे।
गणनातो बहिर्भूताः तस्मात् ते कथिता इतः॥७॥

महेश्वरोपदिष्टेषु मूलसूत्रेषु नैव ते।
किन्तु पाणिनिना पश्चात् स्वोपयोगाय योजिताः॥८॥

प्रत्याहारविधानार्थं तेषां सूत्रेषु योजनम्।
सम्बन्धितेषु वर्णेषु गणनां नार्हतामपि॥९॥

प्रत्याहारो हि नैकेषां वर्णानामेकसंज्ञया।
समाहाराय संसृष्टा संज्ञा पाणिनिना स्वयम्॥१०॥

पूर्वाक्षरेण केनापि सह संयोजनादिताम्।
जायते नामधेयं यत् प्रत्याहारः स उच्यते॥११॥

प्रत्याहारेण तत्रत्याः प्रथमाक्षरमिश्रिताः।
गृह्यन्ते मध्यमा वर्णाः किन्तु ते नान्तिमा इतः॥१२॥

यथा हि अइउवर्णा अण्नाम्ना प्रतिसूचिताः।
इउऋलृ च चत्वारो वर्णा इगिति संज्ञिताः॥१३॥

आद्यायां तु चतुःसूत्र्यां उपदिष्टाः स्वराक्षराः
ततः दशसु सूत्रेषु व्यञ्जनानां निदर्शनम्॥१४॥

श्रवणग्रहणः शब्दो वर्णोऽवर्णश्च स द्विधा।
भाषात्मको भवेद्वर्णः निर्वर्णः केवलो ध्वनिः॥१५॥

स्वरव्यञ्जनभेदेन वर्णशब्दो द्विधा भवेत्।
अन्यो भेरीमृदङ्गादिजन्यः शब्दो ध्वनिर्मतः॥१६॥

(शब्दो वर्णात्मको द्वेधा स्वरव्यञ्जनरूपतः।
ध्वनिर्भेरीमृदङ्गादिशब्दो वर्णभिदां विना॥)

वर्णैः शब्दोदयः सार्थः सार्थैः शब्दैः पदोदयः।
पदैर्वाक्योदयश्चैवं भाषणं वर्णमूलकम्॥१७॥

गद्यपद्यात्मकं लोके भाषणं द्विविधं मतम्।
गद्यं छन्दोविनिर्मुक्तं पद्यं छन्दसि संयतम्॥१८॥

एकार्थसमवेतानाम् अन्वितानां परस्परम्।
सुप्तिङन्तपदानां हि सञ्चयो वाक्यमुच्यते॥२०॥

अपदं न प्रयुञ्जीत विभक्त्यन्तीकृतं पदम्।
नामधात्वन्तयोगार्हा सुप्तिङ्शब्दा विभक्तयः॥२१॥

सुबन्तं च तिङन्तं च द्विविधं पदमुच्यते।
सुबन्तं सुब्विभक्त्यन्तं तिङन्तं तिङविभक्तियुक्॥२२॥

सुप्तिङन्तपदानां हि योजनातः परस्परम्।
वाक्यं निर्मीयते तच्च भाषणेषु प्रयुज्यते॥२३॥

सुप्तिङन्तं विधायैव वक्तव्यं संस्कृते सदा।
अपदं न प्रयुञ्जीतेत्येतस्यार्थोऽयमेव हि॥२४॥

प्राचार्य
श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर

# रामानन्ददर्शने भक्तिस्वरूपम्

❑ श्रीमती अंजना शर्मा

भज् सेवायामिति धातोर्भावे क्तिन्प्रत्ययेन निष्पन्नस्य भक्तिशब्दस्यार्थः प्रेम्णा भगवतः सेवैव भक्तिः प्रतीयते। अतो भगवति जगदीश्वरेऽनन्यानुराग एव भक्तिः।

पद्मपुराणस्य श्रीमद्भागवतमाहात्म्यानुसारं भगवतः प्रसन्नतायै तत्प्राप्तये च एकमात्रं कारणं भक्तिरेव प्रोक्तास्ति–

**न तपोभिर्न वेदैश्च न ज्ञानेन नापि कर्मणा।**
**हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः॥**

भक्त्या भगवान् सर्वमपि कार्यं परित्यज्य भक्तस्य कृतेऽलौकिकं कर्म निवर्तयति असंभवञ्च कार्यं सम्भावयति। सर्वशक्तिसम्पन्नः कर्तुमकर्तुमन्यथाकर्त्तुं सर्वथा समर्थो भगवान् श्रीकृष्णः पाण्डवकुलनन्दनस्य धर्मराजस्य भक्तिगुणगणाकृष्टः कौरवकुलं दूरे परित्यज्य पाण्डवकुलस्य मङ्गलचिन्तायां नियतं व्यापृतो भूत्वा अर्जुनस्य सारथ्यमपि स्वीचकार। भक्तराजस्य प्रह्लादस्योत्कृष्टया भक्त्याऽऽकृष्टो यत्र यत्र तस्य विपदमभिलक्षितवान् तत्र तत्र तां वारयितुं प्रववृते। मदोन्मत्तस्य करिणः पादतलेन मर्दितः शैलशिखराद् भूमौ प्रक्षिप्तो जीवनापहारकं च विषलड्डुकं मधुरमोदकत्वेन परिणमय्य भगवता परिपालितः प्रह्लादः। हरिनामस्मरणमात्रेण भक्तिरसाभिप्लुतः प्रह्लादः 'क्व ते नारायणः' इति पित्रा सरोषं पृष्टः। सर्वत्रैव वर्तते मे नारायणः इत्युक्तवान्। पुनर्यदि सर्वत्रैव वर्तते ते नारायणस्तदत्र स्तम्भेऽपि वर्ततां नाम इत्युक्तवति पितरि 'बाढम्' इति यदा प्राह प्रह्लादस्तदैव तेन सगर्वमभिहतात् स्तम्भान्नारायणो नृसिंहरूपेणाविर्भूय भक्तस्य प्रतिकूलाचारिणं हिरण्यकशिपुं नखैर्विदार्य पञ्चत्वं प्रापयामास, प्रह्लादं तद्राज्येऽभिषिच्य भक्तस्य भगवच्चिन्तनपरस्य साहाय्यं सम्पादयामास। तथा चाह श्रीमद्भागवते भगवान् व्यासदेवः –

**सत्यं विधातुं निजभृत्यभाषितं**
**व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः।**
**अदृश्यतात्यद्भुतरूपमुद्वहन्**
**स्तम्भे सभायां न मृगं न मानुषम्॥**

अनन्यया भक्त्या सन्तुष्टो भगवान् भक्तस्य सर्वविधां विपदं वारयति, मनोरथं च सर्वं पूरयत्येव। गोपदमिव संसारसागरमुत्तीर्य भगवद्भक्तः परमं पदं लभते।

**तथाह श्रीमद्भागवते –**

**समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः।**
**भवाम्बुधिर्वत्सपदं परं पदं परं पदं यद्विपदां न तेषाम्॥**

भगवति समासक्तो भक्तस्तद्भक्तिं लब्ध्वा न पुनः जन्ममरणचङ्क्रमितो भवति। तथा हि ब्रह्मादयो देवा देवकीगर्भगतं भगवन्तं स्तुवन्ति –

**शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्**
**नामानि रूपाणि च मङ्गलानि ते।**
**क्रियासु यस्त्वच्चरणारविन्दयो–**
**राविष्टचेता न भवाय कल्पते॥**

अपि च उपनिषच्छास्त्रसर्वस्वभूते गीताशास्त्रे द्वादशाध्याये भक्तियोगस्योपपादनं सम्यग्रूपेण दरीदृश्यते। यद्यप्यत्र कर्मयोगज्ञानयोगसहिता बहवो योगाः सन्ति खलु प्रतिपादिताः, तथापि भक्तियोगं महता समारोहेणोपपादयन् भगवान् श्रीकृष्णोऽर्जुनं प्रति समुपदिशति –

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।**
**शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥**

एवञ्च बहून्यत्र वचांसि भक्तियोगेनोपदिष्टानि। तथा हि –

**ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।**
**श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥**

एवञ्च श्रीमद्भागवते त्रयो योगा भगवत्प्राप्तिसाधन भूताः वर्णिताः –

**योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया।**
**ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥**

इति उक्तं भगवता श्रीकृष्णेन। युज्यतेऽनेनेति योग इति व्युत्पत्त्या योगशब्दो जीवपरमात्मनोर्योगं (मेलनं) बोधयति। ज्ञानमेव योगो ज्ञानयोगः, भक्तिरेव योगो भक्तियोगो, कर्म एव योगः कर्मयोग इति च समासः। योगशब्दोऽस्मिन्नर्थे विवक्षितो वर्तते। विशिष्टाद्वैतमते परमात्मनोऽज्ञानादेव बन्धः प्रतिपादितः, तज्ज्ञानाच्च मोक्षो भवति। अत्र च –

इति वचनमप्यनुकूलम्। भक्त्या भगवन्तं ज्ञात्वा विशत इति कथनेन भगवति प्रवेशात् संसारान्मोक्ष इति सूच्यते। तदनन्तरं विशत इति कथनेन भगवतः तत्त्वज्ञानात् प्राक् न विशत इत्यर्थो लभ्यते। अतो भगवतस्तत्त्वज्ञानात् प्राक् संसारो भवतीत्यर्थलाभः स्पष्ट एव भवति।

श्रीमद्भागवत एव ज्ञानस्य कर्मणां भक्तेश्चाधिकारिणो निरूपिताः –

**निर्विण्णानां ज्ञानयोगौ न्यासिनामिह कर्मसु।**
**तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्॥**
**यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।**
**न निर्विण्णो नापि सक्तो भक्तियोगोऽस्य सिद्धिदः॥**

एतेन ज्ञायते यद् येषां नित्यं कामना उद्भवन्ति, ते कर्मयोगाधिकारिणः। फलत्यागपुरस्सरं कर्म कुर्वाणाः सिद्धिं प्राप्नुवन्ति जनकादिवत् ये त्वत्यन्तं विरक्ता इहामुत्रार्थ-फलभोगविरागवन्तस्तेषां सिद्धिदः। ये च प्राक्तनसंस्कार-वशाद् भगवत्कथादिष्वनुरक्ता नात्यन्तं विरक्ताः, न वाऽत्यन्तमशक्तास्तेषां भक्तियोगः सिद्धिदो भवति।

भक्तेः किं स्वरूपमिति जिज्ञासायाम् आनन्दभाष्य-कारैराचार्य सार्वभोमैर्भगवद्भिः श्री रामानन्दाचार्यैरभिहितं ब्रह्मसूत्रानन्दभाष्ये–

''सा च भक्तिः परमप्रेयोभगवदितरवैतृष्ण्यपूर्वक परमपुरुषानुरागरूपो ज्ञानविशेष एव।''

श्रीवैष्णवमताब्जभास्करेऽपि उक्तम्–

**''सा तैलधारा समनित्य संस्मृतेः,**
**सन्तानरूपेशि परानुरक्तिः॥**
**भक्तिर्विवेकादिसप्तजन्या,**
**तथा यमाद्यष्ट सुबोधकाङ्गा॥''**

अयमर्थः – ईशि ईश्वरे परमात्मनि अविच्छिन्नया स्निग्धया तैलधारया समायास्तुल्याया नित्याया अविच्छन्नायाः संस्मृतेः सन्तानो विस्तारो रूपं यस्याः सा अनुरक्तिः सुरागः प्रीतिः सा परा भक्तिः। सा विवेकादिभिः सप्तभिर्जन्या यमनियमाद्यष्टाङ्गरूपा च।

**विभागाध्यक्षा ( दर्शनविभागे )**
**श्री दादू आचार्य संस्कृत महाविद्यालयः, जयपुरम्**

# संसारसारभूतं ननु भारतं मदीयम्

सारे जहाँ से अच्छा, हिन्दोस्ताँ हमारा-हमारा।
हम बुलबलें है इसकी, यह गुलसिताँ हमारा हमारा।। 1।।
**संसारसारभूतं, ननु भारतं मदीयम्।**
**यदि पक्षिणो वयं स्मः, राष्ट्रं वनं मदीयम्...मदीयम्।। 1।।**
**संसारसारभूतम्.............**

पर्वत वो सबसे ऊँचा, हमसाया आसमाँ का।
वो सन्तरी हमारा, वो पासबाँ हमारा हमारा।। 2।।
**सर्वोच्चभूधरोऽयं, प्रतिस्पर्धते नभस्तः।**
**संरक्षकोऽस्ति यत्र, तद् भारतं मदीयं मदीयम्।। 2।।**
**संसारसारभूतम्.............**

गोदी में खेलती है जिसके हजारों नदियाँ।
गुलशन है जिसके दम से रश्के जिना हमारा हमारा।। 3।।
**नद्यो वहन्ति यस्य, अङ्के सहस्रधाराः।**
**यासां जलेन हरितं, रम्यं वनं मदीयं मदीयम्।। 3।।**
**संसारसारभूतम्.............**

मजहब नहीं सिखाता, आपस में वैर रखना।
हिन्दी हैं हम, वतन है हिन्दोस्ताँ हमारा हमारा।। 4।।
**धर्मे क्वचिन्न दृष्टः अन्योऽन्य द्वेषभावः।**
**प्रेम्णा वयं च ब्रूमः, ननु भारतं मदीयं मदीयम्।। 4।।**
**संसारसारभूतम्.............**

यूनान मिश्र रूमा, सब मिट गये जहाँ से।
अब तक मगर है बाकी, नामों निशां हमारा हमारा।। 5।।
**यूनान मिश्र रूमा, न हि सन्ति भूतलेऽस्मिन्।**
**अद्यापि भाति राष्ट्रं खलु भारतं मदीयं मदीयम्।। 5।।**
**संसारसारभूतम्.............**

कुछ बात है कि हस्तीं, मिटती नहीं हमारी।
सदियों रहा है दुश्मन, दौर ए जमां हमारा हमारा।। 6।।
**इह शक्तिरस्ति काचित्, अस्तित्वरक्षणाय।**
**नाम्ना सदा गरीयः, भुवि भारतं मदीयं मदीयम्।। 6।।**
**संसारसारभूतम्.............**

''इकबाल'' कोई महरम, अपना नहीं जहाँ में।
मालूम क्या किसी को दर्द ए निहाँ हमारा हमारा।। 7।।
**इकबाल नास्ति कश्चित्, स्वीयो जनः मदीयः।**
**ज्ञायाद्धि यो हि कष्टं, अन्तःस्थितं मदीयं मदीयम्।। 7।।**
**संसारसारभूतम्.............**

संस्कृतानुवादकः **पं. साँवरमल शास्त्री**
विजयच्छाया, श्रीजी मन्दिरम् के पीछे, कालाडेरा,
जयपुरम्-303801 (राजस्थानम्)

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# संस्कृते भक्तमाला

भारते प्रायः सार्धसहस्राब्दीभ्यः प्रवहन्ती भक्तिधारा भारतीयां संस्कृतिं भक्तिरसमाधुर्येण सुतरामाप्यायितवती, कोटिशो भक्तानां हृदयान्यपि भक्तिरसेन सेचितवतीति सुविदितमेव सुधियाम्। भक्तिरसस्यैका धारा आराध्यस्यानुरक्तिपरं विपुलं वाङ्मयं सर्जितवती, अपरा चैका धारा प्रावहद् भक्तानां चरितान्यभिलेखयितुं प्रेरणायाः। भक्तचरिताभिलेखस्य प्रबलः प्रवाहो देशभाषासु पर्यलक्ष्यत। प्रान्तीयभाषासु, प्रमुखतश्च भारतस्य काव्यभाषात्वेन प्रथितायां व्रजभाषायां भक्तचरितान्यलेख्यन्त। सर्वाधिकं प्रथितं भक्तचरित-काव्यमस्ति रामानन्दसम्प्रदायरत्नस्य श्रीअग्रदासाचार्य शिष्यस्य नाभादासस्य (नारायणदासस्य 'नाभा' इत्यपरनामवहस्य) व्रजभाषानिबद्धं भक्तचरितसूचकं ''भक्तमाल'' नामकं काव्यं यत् सप्तदश्यां शताब्द्यां जयपुरीयगलतापीठे, सीकरराज्यान्तर्गते 'रेवासा' पीठे च (1642 संवत्) कृतनिवासेन कविनानेन व्रजभाषायाः प्रमुखतः ''छप्पय'' च्छन्दसि 214 पद्येषु निबद्धं संग्रहणीयं चरितकाव्यमस्ति। अस्मिन् हि नारद-प्रह्लादादिपौराणिकभक्तचरितान्यारभ्य रामानुज-मध्व-निम्बार्क-वल्लभादिसम्प्रदायानुयायिभक्तानां, मीराबाई -प्रभृतिभक्तानां, प्रणेतुः समयावधिपर्यन्तमवगतानां 316 भक्तानां संक्षिप्य चरितानि, सूचनाश्चोपनिबद्धा नाभादासेन। काव्यमिदं सुतरां लोकप्रियमभूत्, शताब्दीभ्योऽस्य काव्यस्य सुललिताः सङ्गीतबद्धाः कथा नगरे-नगरे ग्रामे ग्रामे च श्राव्यन्ते।

एवंविधस्य व्रजभाषाकाव्यस्य संस्कृतेऽनुवादः क्रियेत पण्डितैरिति स्वाभाविकमेव। अतो जयपुर-नरेशं सवाई ईश्वरीसिंहमारभ्यानेकैरस्य संस्कृतानुवादा व्यधायिषत, बहुभिरस्य टीकाः भाष्यादीनि च व्यलेख्यन्त, प्रियादास-प्रभृतिभिरेतदनुसृत्यान्यान्यपि भक्तचरित-काव्यान्यलेख्यन्त। प्रमोदस्यं विषयो यद्राजस्थानस्य शेखावाटीप्रदेशे चूरूजनपदान्तर्गत-छापरोपनगर- निवासिना कविवर्येण पं. नथमलशास्त्रिणा दाधीचेन भक्तमालस्योपजात्यनुष्टुबादि-संस्कृतच्छन्दःसु पद्यानुवादो विहितोऽस्ति, स च तेनैव विस्तृत-हिन्दी-टीका-भाष्यादि सहकृतः सपद्येव प्रकाशमानीतः।

अत्र हि मूलग्रन्थस्य 214 पद्यानां 1400 संस्कृतपद्येषु काव्यानुवादोऽप्यस्ति, हिन्द्यां भागवती टीकाप्यस्ति यस्यां विस्तरेण भक्तचरितानि विवृतानि, अन्यानि प्रमाणपद्यान्यप्युद्धृतानि, सूचना अप्युपनिबद्धाः। भक्तमालस्य पूर्वप्रणीतानां संस्कृतानुवादानां प्रकाशनं नोपलब्धमद्य पाठकानां कृते, अतः सर्वप्रथममुपलब्धोऽयं संस्कृतानुवादो भक्तमालायाः संस्कृते प्रथमं प्रकट-मवतरणमिति कथयितुं शक्यते इत्यादि शुभाकांक्षा वैष्णवाचार्याणां विदुषां चास्य प्रारम्भे मुद्रिता अपि सन्ति।

संस्कृतभक्तमालाकाव्यमिदं सर्वविधेषु पाठकेषु स्वागतवाग्भिरभिनन्दयिष्यते इत्याशा स्वाभाविकी। नाभादाससन्तवर्यो राजस्थानस्य भूषणमभूत्। अनुवादकवर्यः पं. नथमलशास्त्री अपि राजस्थानीयः कविरिति राजस्थानस्य गौरवमपीदं काव्यं समेधयेदेव।

**संस्कृतभक्तमाला**- मूलप्रणेता नाभादासः, संस्कृतकाव्यानुवादकः आचार्य पं. नथमलशास्त्री-दाधीचः, प्रका. पं. मालीरामदाधीच-स्मृति-संस्कृत-सेवाशोधसंस्थान, वार्ड नं. 11, श्रीदधिमथीमन्दिर मार्ग, छापर, चूरू पृ. 640 मू. 500/-.

## अद्वैतसिद्धान्त-परिचयः

षड्दर्शनान्तर्गतस्य वेदान्तदर्शनस्य प्रमुखा दर्शनशाखाऽस्ति केवलाद्वैतं, यद द्वैतनाम्ना प्रसिद्धं तस्य च कर्णधारोऽभूदादिशङ्कराचार्यः। इयमेव शाखा ''उत्तरमीमांसा'' नाम्नाऽप्यभिधीयते। अस्या दर्शनशाखाया लक्षशो ग्रन्थाः संस्कृतेऽन्यासु च भाषासु प्रणीताः सन्ति गतासु त्रयोदशशताब्दीषु। दर्शनशास्त्रस्य च्छात्रास्तु पठन्त्येवाद्वैतदर्शनसिद्धान्तान्, संस्कृताध्यापकानां कृतेऽपि सामान्यतोऽद्वैतस्य, तदनु रामानुजाचार्यप्रतिपादितस्य विशिष्टाद्वैतस्य, मध्वाचार्य-प्रतिपादितस्य द्वैतस्य, निम्बार्काचार्यप्रतिपादितस्य द्वैताद्वैतस्य, वल्लभाचार्यप्रतिपादितस्य शुद्धाद्वैतस्य, चैतन्याचार्यप्रतिपादितस्याचिन्त्यभेदाभेदस्य रामानन्दा-चार्यसङ्केतितस्य रामाद्वैतस्य च किञ्चिज्ज्ञानमावश्यकम्।

तदेव विचिन्त्य जयपुरस्थस्य श्रीदादूसंस्कृत-महाविद्यालयस्य प्राचार्यस्य डॉ. सुरेन्द्रकुमारशर्मणः प्रेरणया तस्मिन् महाविद्यालये दर्शन विभागाध्यक्षपदम-धितिष्ठन्त्या श्रीमत्या अंजना शर्मवर्यया दर्शनसिद्धान्तानां परिचायनाय संस्कृते (गद्ये) पुस्तकमेकं व्यलेखि यस्य शीर्षकमस्ति ''अद्वैतसिद्धान्तविमर्शः।'' अत्र हि भूमिकाभागे संक्षिप्य वेदान्तदर्शनस्य परिचयः प्रस्तुतो-ऽस्ति, तदनन्तरं ब्रह्मनिरूपणाध्याये जीवब्रह्मणोरद्वैतं स्पष्टीकृतं, मायानिरूपणाध्याये शंकराचार्याभिमतं मायास्वरूपं परिचायितम्, तत्त्वज्ञाननिरूपणाध्याये तत्त्वमसीति वाक्यविचारः प्रस्तुतः, शंकराचार्याभिमतं जगन्मिथ्यात्वं च स्पष्टीकृतम्। सोऽयं ग्रन्थो वेदान्तदर्शनस्य, विशेषतस्तु शङ्कराचार्येण विशदीकृत-स्याद्वैतदर्शनस्य जिज्ञासूनां, छात्राणां, प्रतियोगितादि परीक्षार्थिनां चापि कृते उपकारी सेत्स्यतीति स्पष्टमेव।

**अद्वैतसिद्धान्तविमर्शः**, ले. श्रीमती अंजना शर्मा प्रका. शोध एवं प्रकाशनविभागः श्रीदादूसंस्कृतमहा-विद्यालयः, मोतीडूंगरी रोड, जयपुर पृ.सं. 120 मू. 150/-.

## काव्यशास्त्रग्रन्थः

सुविश्रुता एव संस्कृतजगति मनीषिमण्डलमूर्धन्याः, कालिदासग्रन्थावली-प्रकाशनेनाधिगतसुविमलयशसः, कविप्रवराः, शृङ्गारप्रकाश-नाट्यशास्त्रादिविवेचन-विशेषज्ञाः, काव्यशास्त्रप्रणयनपटवो वाराणसेया म. म. रेवाप्रसाद द्विवेदिमहाभागाः। तैः प्रणीताः काव्यशास्त्रग्रन्था अपि सुविदिताः। प्रमोदस्यायं विलषयो यत्तैः प्रणीतो नूतनः काव्यशास्त्रविवेचकः, काव्य-शास्त्रेतिहासाभिलेखपरश्च ग्रन्थः ''साहित्यालङ्कारः'' प्रकाशमाप्तः। अस्मिन् हि अनुष्टुप्प्रभृतिच्छन्दोबद्धैः प्रायः सप्तशतसंख्याकैः पद्यैः साहित्यशास्त्रस्य विविधाः पद्धतयः ''कल्प'' नाम्ना ऽभिलिखिता वर्णिताश्च, कथं शास्त्रस्यास्येतिहासे ध्वन्यात्मवादेन प्रथमा क्रान्तिः काश्मीरकैरानायिता, शब्दशक्तिवात्ययाऽपरा क्रान्तिरागता, विकल्पवादरूपाऽपि काचित् क्रान्तिरागतेति साटोपं विद्वद्वर्येण साधु वर्णितम्।

इत्थं हि साहित्यशास्त्रेतिहासस्य विशिष्टया दृष्ट्या विलोकनं प्रस्तुवन्नयं ग्रन्थो द्विवेदिवर्याणां प्रौढप्रातिभप्रकर्षमपि प्रकटयति, यत्र कुत्र प्रबलान् प्रहारानपि प्रदर्शयति। समस्तस्यापि काव्यशास्त्रस्य सम्पूर्णविहगालोकनविधया समग्रं चित्रं प्रस्तुवन्नयं ग्रन्थः सुतरां प्रहर्षाधायको भवेत् सर्वविधानां पाठकानामित्यस्य हार्दं स्वागतं ब्रुवाणा वर्धपयामो विद्वद्वर्यान् म.म. पं. रेवाप्रसादद्विवेदि 'सनातन' वर्यान्।

ग्रन्थस्यास्य 657 कारिकाणां यथासमयं हिन्दीभाष्यमपि प्रकाशयिष्यत इति सूचनाऽपि प्रमोदावहा।

ग्रन्थस्य मुखपृष्ठे ''साहित्यागम:'', ध्वनि: (अमान्य:) शब्दशक्तय: (अमान्या:) विकल्पवाद: (मान्य:) इति सङ्केतविधया मुद्रणेन नूतनां काञ्चित् स्वकीयां समालोचनदृशं प्रकटयन्ति लेखकवर्या इति दृष्ट्वा जिज्ञासा-विस्मय-विनोदादिभावशबलतामनु-भविष्यन्ति पाठका:। समग्रस्यापि साहित्यशास्त्रे-तिहासस्य समालोचनाविधयाऽनुशीलनमनेन ग्रन्थेन विधीयते तेन च नूतना दिश: प्रकाश्येरन्निति तु स्पष्ट मेव।

**साहित्यालङ्कार:** ले. म.म. पं. रेवाप्रसादद्विवेदी सनातन: प्रका. कालिदाससंस्थानम् 28 महामनापुरी, काशी हिन्दू विश्वविद्यालय परिसर:, वाराणसी पृ. सं. 100 मू. 150/-.

## संस्कृतेऽनूदिता भारतीयकथा:

आधुनिके युगे देशभाषीयाणां वैदेशिकीनां च लघुकथानां संस्कृतेऽनुवादस्य परम्परा सुविदिताऽस्ति। परम्परायामस्यां राजस्थानीयस्यानुवादकद्वयस्य साधीयान् नूतनोऽनुवादप्रक्रम: सपद्येव प्रकाशमायात इति ज्ञात्वा प्रसीदेयु: पाठका:। प्रमुखतो वङ्गभाषाया: 16 कथानां, अन्यभाषाभ्यो गृहीतानां च 4 कथानाम्, इत्थं 20 भारतीयभाषाकथानां संस्कृतेऽनुवाद: कोटावास्तव्येन डॉ. लक्ष्मीनारायणशर्मणा तत्सहयोगिन्या डॉ. कल्पना शृंगीवर्यया च कृत:, अनुवादे तदिदं स्वातन्त्र्यमप्य-वलम्बितं यद् यत्र कुत्रचन प्राचीनसूक्तीनामप्युक्तीनां चोद्धरणं सङ्गतं प्रत्यैयत, तत्र तदपि समावेशितम्। अत्र हि प्रसिद्धस्य वङ्गकथाकारस्य शरच्चन्द्रस्य 6 कथा:, रवीन्द्रनाथस्य 9 कथा:, प्रेमचन्द्रस्य 1 कथा दृश्यते। कथानामाकारोऽतिसंक्षिप्त:, अनुवादोऽपि स्वतन्त्र इति संक्षिप्त: बालकानां कृते सुबोध: स्यादित्याकूतं प्रतीयते।

अपेक्षाकृते स्थूलतरे टंकणाक्षरप्रकल्पे मुद्रित-त्वादेता: कथा वयोवृद्धैरपि सारल्येन पठनीया: स्यु:, बालैरपीति प्रकाशकानां मुद्रकाणां चाऽप्याशय: प्रतीयते। कथाविंशतिरियं प्रसादयेत् सर्वविधान् पाठकानिति विश्वसिम:।

**अनूदितकथावल्लरी** अनुवादकौ डॉ. लक्ष्मीनारायण शर्मा, डॉ. कल्पना शृंगी, सम्पादक:, डॉ. महावीरसाहु:, प्रका. सविता दाश 17/73 आचार्यपल्ली, नरेन्द्रपुर, कोलकाता पृ. सं. 84 मू. 150/-.

---

**संस्कृतसमाचारा:**

## ऐषम: सम्माननीया विद्वांस:

ऐषमो राष्ट्रपतिसम्मानामय चिता विद्वांस: श्री आर. वेङ्कटरामन्, विश्वनाथगोपालकृष्ण, जियालाल संबोध प्रियतमचन्द्रशास्त्री गुरुपदकुमार हेगडे एस.पी. नागराज लक्ष्मीप्रसन्नांजनेयशर्मा, डॉ. लक्ष्मी शर्मा, विश्वनाथभट्टाचार्य, रामनारायणदास, हृदयरंजनशर्मा, जानकीप्रसाद द्विवेदि प्रभृतय: सन्तीति सूचनाऽधिगता। वैदेशिकविद्वान् फर्नान्डो टोला प्राकृत पाली विद्वांस: प्रो. दामोदरशास्त्री बेलाभट्टाचार्य योगेश जैन बादरायण पुरस्करणीयेषु महानन्द झा सुन्दर नारायण झा जी एस पी दत्तात्रेयमूर्ति विश्वनाथभीपाल शंकर राजारामन् वर्तन्ते इति यथासूचितं प्रस्तूयते। एनेषु डॉ. लक्ष्मी शर्मा जयपुरीया विदुषी, प्रो. दामोदरशास्त्री राजस्थानीयों विद्वान् (लाडनूंनगरे विश्वभारती विश्वविद्यालयस्थ:), तथैव योगेश जैन इति सूचयन्त: प्रमोदामहे।

# अद्वैतं सुखदुःखयोः ( स्मृतिकथा )

❑ डॉ. हर्षदेवमाधवः

गुर्जरसाहित्याकतम्या १९९६ तमे संवत्सरे जनवरी मासे संस्कृतसाहित्ये महात्मा गान्धी इति विषयमधिकृत्य एकः त्रिदिवसीयः परिसंवादः आयोजितः। तस्य संयोजकः संपादकश्च अहमासम्। मया संस्कृतकाव्यानां सञ्चयः कृतः। गुर्जरभाषाया गान्धिविषयकानां काव्यानामनुवादं कारयितुम् अस्माभिर्विचारितम्। अतः एकस्याः कार्यशालाया आयोजनं कृतम्। गुर्जरभाषायाः संस्कृते अनुवादकर्तॄन् आहूय तेषाम् अनुवादान् परामर्शयितुं केचित् विद्वांसोऽपि अर्बुदाचले सङ्गोष्ठ्यां निमन्त्रिता आसन्।

तेषु विद्वत्सु जयानन्ददवेमहोदयः राजकोटनगरे प्रख्यातो मूर्धन्यः संस्कृतविद्वान् आसीत्। जयानन्दाचार्यो वयोवृद्धो ज्ञानवृद्धश्च आसीत्। प्रकृत्या सरलः काव्यज्ञः मृदुभाषी अयं विद्वान् अस्माभिः सह कारयानेन प्रस्थानं कृतवान्। तस्य अर्धाङ्गिनी अपरेण कारयानेन आगच्छति स्म। अवस्थानुरूपं तस्य स्वास्थ्यं रक्षितुं साऽपि शैत्यकाले दुर्दिने आगन्तुं साहसम् अकरोत्।

अस्माकं कारयानेन घण्टात्रयं यावत् यात्रां कृत्वा अस्माभिर्निश्चितं स्थानं प्राप्तम्। तदा द्वादशवादनं जातम्। भोजनवेला आसीत्। सहसा जयानन्दाचार्यः अस्मरत् यत् स जलपात्रे निक्षिप्तां कृत्रिम-दन्तावलीमानेतुं व्यस्मरत्। कृत्रिमदन्तावलीं (denture) विना तस्य कृते भोजनं न शक्यम्। स विहस्यावदत् 'अहं संस्कृताध्यापकोऽ-स्मीति सिद्धम्। अध्यापकानां स्मृतयो दुर्बला भवन्तीति यूयं जानीथ। मा चिन्तां कुरुत। मम अर्धाङ्गिनी आगमिष्यति तदा तस्याः कृत्रिमदन्तावल्या अहं भोजनं करिष्यामीति। दुर्भाग्यवशात् अपरं कारयानं मार्गे स्थगितं जातम्। यान्त्रिकीक्षतिवशात् अहं भोजनं करिष्यामीति। दुर्भाग्यवशात् अपरं कारयानं मार्गे स्थगितं जातम्। यान्त्रिकीक्षतिवशात् आचार्यपत्नी न अगताऽऽसीत्। अतिक्रामति स्म भोजनवेला। आपराह्ले द्विवादने जयानन्दाचार्येण जलं निपीय उदरपूर्तिः कृता। जयानन्दाचार्यो वारं वारं कथयति स्म यन्मम पत्नी मम विषये चिन्तयन्ती दुःखिता स्यात्। तयाऽपि स्मृतं भवेद् यन्मया कृत्रिमदन्तावलीं गृहे विस्मृत्य प्रस्थानं कृतम्। अहं तस्यै किं कथयिष्ये ? मम स्वभावात् सा निरन्तरं दुःखमनुभवतीति। तया मार्गे भोजनं कृतं भवेन्नवेति महती चिन्ता जायत इति।

सायंकाले षड्वादने अपरं कारयानमागतम्। विह्वला आचार्यपत्नी आचार्यं मार्गयन्ती मह्यमपृच्छत्, 'कुत्र वर्तते भवताम् आचार्यः ? किं तेन किञ्चित् खादितं वा न ? तस्य समीपे तस्य कृत्रिमदन्तावली नास्ति। स तु शिवकल्पः संसारव्यवहारानभिज्ञः अस्ति। स बुभुक्षितो भवेदद्यापि। किन्तु अधुना नास्ति चिन्ता। मम कृत्रिमदन्तावली तस्य मुखेऽपि कार्यं साधयति। आवामतएव द्वावेव गच्छावः। अन्यथा स तु बुभुक्षितो म्रियेत्' इति।

तदानीमेव पथिकालयस्य बहिः काष्ठफलके उपविष्टो जयानन्दाचार्यः आगतः। तं विलोक्य आचार्यपत्नी बाष्पपर्याकुलेक्षणा रोदितुमारभत, 'अरे हा धिक्। अहं विलम्बेन आगता। अतः भवान् अद्यापि क्षुत्क्षामकण्ठः दृश्यते। मया पातिव्रत्यस्य पालनं न कृतम्। किन्तु मयापि अद्यावधि न किञ्चित् खादितम्। प्रथमं भवान् खादतु। अहम् अत ऊर्ध्वमेव अन्नकणं मुखे निक्षेप्स्यामीति।' तच्छ्रुत्वा आचार्यजयानन्दोऽपि बाष्पगद्गदकण्ठो जातः। अयि मूढे ! अहं पापस्तु जलं निपीय उदरपूर्तिं कृतवान्। तव विषये मया विचारोऽपि न कृतः। प्रथमं त्वं भोजनं कुरु। अहं ततः पश्चात् अन्नग्रहणं करिष्यामीति।

वयं पञ्चषाः प्रेक्षकाः भावुकाः जाताः। कीदृशोऽस्ति प्रणयबन्धः। कीदृशी वर्तते प्रणयिजनस्य चिन्ता। किन्तु अधुना तु एतौ कः प्रथमं भोजनं कुर्यादिति स्पर्धां कुरुतः।

कतिपयक्षणान् यावत् 'प्रथमं त्वं', 'प्रथमं त्वम्' इति विवादं कृत्वा जयानन्दाचार्यः पत्न्याः हठाग्रहेण विगलितः। तस्याः कृत्रिमदन्तावलीं गृहीत्वा आचार्यः भोजनमकरोत्। तत्पश्चात् कृत्रिमदन्तावलीं विशुद्धां कृत्वा सः स्वस्य अर्धाङ्गिन्यै प्रायच्छत्। परस्परं क्षमावचनानि उक्त्वा तौ भोजनं कृत्वा आगतौ। दिनत्रयं यावत् एकया कृतकदन्तावल्या क्रमोऽयं प्राचलत्। अहं भवभूतेः 'उत्तररामचरितस्य' **'अद्वैतं सुखदुःखयोः'** श्लोकस्य चरितार्थं ज्ञातवान्।

अहं यदा कदापि भवभूतेः इमं श्लोकं स्मरामि तदा जयानन्दाचार्यस्य दयनीयाकृतिं गुरुपत्न्या विह्वलाकृतिञ्च स्मरामि। स्मरामि तां कृतकन्दन्तावलीं यया साधितमद्वैतं द्वयोः। अपि पाश्चात्यसभ्यतां ज्ञातुं समर्थाऽस्ति अस्य श्लोकस्य परमार्थम्? जयानन्दाचार्यं स्मृत्वा अद्यापि प्रेम्णो रहस्यं किमपि किमपि हृदयोत्कीर्णं करोमि।

८, राजतिलक बंग्लोज, आबादनगरम्, बस स्टोप समीपे, पेट्रोलपम्प निकटे, बोपल, अहमदावाद-३८००५८

श्रीमतां बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने-

## विंशः प्रसङ्गः धर्मस्वीकरणम्

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

पुरा मम गृहे मुस्लिमधर्मस्य मान्यता आसीत्। अहमदाबादनगराद् दशमाइलदूरे पिशनानामग्रामोऽस्ति। यस्मिन् मुहम्मदहजरतपैगम्बरमहोदस्य वंशजानां श्मशानभूमिः (कब्र) अस्ति। मम पूर्वजास्तामेव पूज्यां मन्वानाः आसन् अहमप्यस्मिन्नेव पिरानाधर्मे समुत्पन्नः।

पिरानाधर्मस्येतिहासे एवं खलु वर्ण्यते यद् गुजरातप्रान्ते यदा मुहम्मदस्य बेगडाख्यस्य राज्यमासीत्तदा तेषां वंशजाः पिरानाग्रामे समागताः। अनन्तरं ते आजीविकादिवशात्तत्रैव न्यवसन्। तत्रैव च तेषां मृत्युरप्यभूद्। मरणानन्तरं तेषां श्मशानभूमिः (कब्र) तत्रैवाभवत्। गंभीरतयान्वेषणेन ज्ञातं मुहम्मद बेगडाख्यस्य राज्ये हिन्दूनामुपरि महानत्याचारः समभवत्। तादृशेभ्योऽत्याचारेभ्यः संरक्षणार्थं हिन्दुभिरापद्धर्म इति कृत्वा पिरानाधर्मः स्वीकृतः। अस्मिन् धर्मे ब्राह्मणः, वैश्याः, मत्स्य विक्रेतारः, पाटिलाः, राणाः, चर्मकाराः सर्वे समाविष्टाः। पिरानाग्रामे एते सर्वेऽपि पृथक् पृथक् स्वं स्वं कार्यं कुर्वन्ति।

कथनस्यार्थः यदेवमस्माकं पूर्वजाः ये पूर्वं हिन्दवः आसन् इमं धर्मं स्वीकृतवन्तः। अस्माकं परिवारोऽपि पिरानाग्रामे वसन्नासीत्। अस्माकं परिवारोऽतीव दृढतया धर्ममिमं स्वीकुर्वन्नासीत्। परं कृषिकार्यं तत्रापि च कछियापटेलत्वाद् लीलामोमिजनाम्ना प्रसिद्धाः। बहिः हिन्दुनाम, आचारश्च हिन्दुसदृश एव स्थितः। अभ्यन्तरे तु वयं पूर्णतया दृढतया हजरतमुहम्मदस्य देवदूत-स्यानुयायिन आस्म। अस्माकं परिवारः एतावान् दृढः यन्मम पितामहस्य छगनलालहरीभाईमहोदयस्याप्यत्र श्मशानभूमिरस्ति। तत्र च तन्नामाङ्कितः प्रस्तरः संयोजितोऽस्ति। यदाहं बालक आसम् मम माता मां तत्र नयति स्म मां पुष्पाण्यर्पयितुमाग्रहं च करोति स्म। मया च पुष्पार्पणं क्रियते स्म।

अस्मिन् पिरानाधर्मे यवनानामिव खननक्रिया तु भवति। भेदस्त्वेतावान् यदस्मिन् दाहक्रियानन्तरमस्थ्नामेव खननं भवति। अहं यदा त्रयोदशवर्षीय आसम्-मम मातुर्मृत्युरभवत्। तस्याः अस्थीन्येवमेव खनितानि। अहं तदुपर्यपि पुष्पाणि समार्पयम्। मातुर्मृत्योरनन्तरमहं मातामह्याः संमीपे न्यवसम्। मम मातामही धर्ममिमं दृढ-तया स्वीकुर्वन्त्यासीत्। मय्यपि तस्य प्रभावः संजातः। अहमप्यचिन्तयंकस्यामप्यवस्थायां धर्मोऽयं नैव त्यक्तव्यः। एकं पदमग्रे संवर्द्धय पूर्णो यवन एव भवेयं नाम। परं धर्मस्यास्य परित्यागः पाप एव। एतादृशी मेम धारणासीत्। परं संघशिक्षावर्गे बाबा महोदयानां विचारं श्रुत्वा मम चिन्तने परिवर्त्तनमभूत्। यदा संघशिक्षावर्गा-त्परावृत्य गृहं समागतः, अपरस्माद्दिनादेव मया पिरानाधर्मासनस्य-यद्धि अस्माकं कुटुम्बस्य स्वामित्वे आसीद्-दर्शनार्थं गमनमवरुद्धम्। मम मातामही कुपिताभूत्। सा अपृच्छत्-त्वं दर्शनार्थं किं न गतः? अहमवदं-श्वः गमिष्यामि परं मया दर्शनमवरुद्धमेव। मम मातामह्यावगतमेव, मां भर्त्सयन्ती सा अवदत् त्वं संघशाखायां गमनेनाधर्मी संवृत्तः।

अहमेतं धर्ममङ्गीकरोमीति ज्ञानमत्रत्याय प्रचारकाय श्रीमते कान्तिबन्धुभट्टायापि वर्षचतुष्टयं यावन्नासीत्। साम्प्रतं मया तेऽवबोधिताः यदहमेतं धर्मं त्यक्ष्यामि। अनन्तरं स्वज्ञातीयानां वयस्यानां विचारेषु परिवर्त्तनं कृतम्। तेऽपि स्वविचारानुयायिनो विहिताः। किञ्चित्समयानन्तरमस्माभिः सुहृदगणे मिलित्वा निश्चयः कृतः यदेकस्यां रात्रौ नववादनतः पश्चादिदमासनं निष्कासयिष्यामः। मम मातामह्यै तस्य ज्ञानमभवत्।

साऽवदत्-त्वमेवंकरिष्यसि चेदन्धो भविष्यसि। भित्तिकाभिः संघर्षं करिष्यसि, अपमृत्युस्ते भविष्यति, यदि जीवितः स्याः तव शरीरे कीटसंक्रमणं भविष्यति।

तस्या इदं वचनं श्रुत्वाप्यस्माकं निश्चये परिवर्त्तनं नैवाभवत्। प्रत्येकस्माद् गृहादेकैको युवा एकत्रितोऽभूत्। एतेषां संमुखे अहमवदं वयस्याः यद्यासननिष्कासन-समये मयि काचिद् विकृतिः भवेत्तदा तु भवद्भिर्नेदं करणीयमन्यथा तु सर्वैर्मम सहयोगो विधातव्यः। एतदनन्तरं मया कार्यमारब्धम्। सर्वैर्मिलित्वा आसनं निष्कासितम्।

तदनन्तरं पूर्वनिश्चितकार्यक्रमानुसारं स्वामिनमेकं समाहूय वेदमन्त्रोचारणपूर्वकं गंगाजलेन स्थानशुद्धिं विधाय भगवतो युद्धपलायितकृष्णस्य (रणछोडरायस्य) चित्रमेकं तत्र स्थापितम्। धूपदीपार्त्तिक्यं विधाय मन्दिरस्य स्थापना कृता।

ईस्वीये 1949 वर्षेऽस्माभिः सर्वबन्धूनां परामर्शेना डाकोरास्थानाद् युद्धपलायितकृष्णस्य (रणछोडराय-स्य) मूर्तिं समानीय महदुत्साहपूर्वकं तस्याः स्थापना कृता। एवं चास्माकं समग्रा जातिरेव स्वपूर्णधर्मे हिन्दुरूपे समागता। बाबामहोदयानां तेजस्विविचाराणामेव सुफलमिदं प्रत्यक्षमभूत्।

---

**प्रेरकप्रसङ्गशतकम्**

**द्विचत्वारिंशः प्रसङ्गः**

# अन्तिमोपदेशः

**❑ मा. श्रीमती आराधना धर्माधिकारी**

गुरुकुलस्य सर्वे शिष्याः अत्यन्तमुत्साहपूर्णाः आसन्। तेषां द्वादशवर्षात्मिका शिक्षा अद्य पूर्णा भविष्यति। अधुना च ते स्व-स्व गृहं परावर्त्तितुं शक्नुवन्ति। गुरुरपि शिष्याणां शिक्षया दीक्षया प्रसन्न आसीत्। गुरुकुलपरम्परानुसारं च शिष्योभ्योऽन्तिमो-पदेशस्य सज्जायां व्यस्त आसीत्।

सर्वे शिष्याः एकस्मिन् स्थाने एकत्रिता अभवन्। गुरोर्हस्ते काष्ठक्रीडकान्यासन्। ते शिष्यानवदन्-भवद्भिरेतेषु त्रिषु भेदोऽन्वेषणीयः? सर्वे शिष्याः ध्यानपूर्वकं क्रीडनकान्यपश्यन्। त्रीण्यप्येकसदृशा-न्यासन्। अहो एतेषु को भेदः भवितुं शक्नोति, तदैव कश्चिदवदत्-अरे पश्यतदम्-अस्य पुत्तलिकस्य कर्णे छिद्रमस्ति। सङ्केतोऽयं पर्याप्तः। शीघ्रमेव सर्वैर्भेदो ज्ञातः गुरुं चावदन्-एतेषु पुत्तलिकेषु केवलमयमेव भेदः एकस्योभयोः कर्णयोश्छिद्रमस्ति, अपरस्य चैकस्मिन्-कर्णेऽपरं च मुखे तृतीयस्पचैकस्मिन्नेवकर्णे नान्यत्र।

गुरुरवदत्-नितरां सत्यम्, तेन च लौहस्यैकं सूक्ष्मं सूत्रमादाय शिष्येभ्यस्तं कर्णछिद्रे प्रवेशयितुं कथितम्। शिष्यैस्तथैव कृतम्। सूत्रं प्रथमस्यैकस्मिन् कर्णे प्रविश्यापरस्मात्कर्णान्निस्सृतम्, द्वितीयस्य कर्णे प्रविश्य मुखान्निस्सृतम्, तृतीयस्य तु कर्णे प्रविश्य न कुतोपि निस्सरितुं प्राभवत्। तदा गुरुरवदत्-वत्साः! पुत्तलिकानामिव युष्माकं जीवनेऽपि त्रिविधाः जनाः आगमिष्यन्ति। प्रथमः पुत्तल एतादृशानां जनानां प्रतीकं ये एकस्मात् कर्णाद् भवतां कथनं श्रुत्वाऽपरस्मान्नि-स्सारयन्ति। तं स्वं संकटंनैव श्रावयत। द्वितीयश्चैतादृशानां प्रतीकं ये हि भवत्कथनं श्रुत्वाऽन्येभ्यो निगरन्ति। एतादृशेभ्यस्तु स्वं रक्षयत, न महत्त्वपूर्णाः वार्त्ताः कथनीयाः। तृतीय एतादृशानां जनानां प्रतीकं ये भवत्कथनं श्रुत्वा न कस्मायपि प्रकटयन्ति। ते खलु विश्वसनीयाः। तेषां सम्मुखे स्वसमस्यानां समाधानार्थं परामर्शं कुरुत। एतादृशा नैव त्यक्तव्याः।

# श्रीसुभाषचरितम् महाकाव्ये अलंकार-योजना

❑ प्रो. अर्चना दुबे

श्रीसुभाषचरितम् महाकाव्ये अलङ्काराणां शोभा सुमहती वर्तते। अनुप्रास, उपमा, उत्प्रेक्षा, रूपकं, अनेकानेके अलंकारा दृश्यन्ते।

श्रीसुभाषचरितम् महाकाव्यकारेण प्रायश: सर्वे अलंकारा उपयोजिताः। अनुप्रास, उपमा, उत्प्रेक्षा, रूपकं, यमकं, अर्थान्तरन्यास आदि। कवे: की प्रिय: अलंकार 'उपमा'।

**सुभाषं सुपुत्रं पृथिव्यां शयानं**
**विलोक्याकुला तं स्वकीयां सुशय्याम्।**
**समानेतुकामा समाकारयत्सा स**
**सस्मार शम्भोः प्रचण्डं तपस्तु।।** [1]

अनुप्रास अलंकारस्य शोभा दर्शनीया।

**गतो विदेशं पठनाय सज्जितः**
**परिश्रमश्चातिकृतो महात्मना।**
**फलं परीक्षाजनकं सुखावहं**
**समादरस्तेन समादृतस्तु नो।।** [2]

वर्णसाम्यमनुप्रास: 9/79 नवम उल्लास (काव्यप्रकाश)

उपमा अलंकार:

**विशिष्टकोलाहलमध्यसेवकाः**
**सभासदो नैजपदानि तत्यजुः।**
**समपर्यामासुरतीव पीडिता**
**विचित्रभूतः समयोऽतिदारुणः।।** [3]

उपमा अलंकारस्य अनुपमेयता पदे-पदे दर्शनीया।

**स तत्र गत्वा कथयेद्धि तान्प्रति**
**स्वकीयनीतिं सुविविच्य घोषितुम्।**
**स्वेदशकल्याणदिशि स्वयं हि तैः**
**स्वतन्त्रतास्माकमतीव रोचते।।** [4]

1 श्रीसुभाषचरितम् 1/11/41
2 श्रीसुभाषचरितम् 2/19/25 अनुप्रास अलंकार
3 श्रीसुभाषचरितम् 7/83/26, उपमा अलंकार
4 श्रीसुभाषचरितम् 7/84/29, उपमा अलंकार

**इयं हि सुस्पष्टमपेक्षिता सदा**
**सुघोषणा तैरतिशान्तभावतः।**
**अनेन चाश्वासनरूपसन्धिना**
**भवेत्तु तैर्मैत्र्यमतीव प्रक्षमम्।।** [5]
**स्वनिश्चयोऽसौ प्रहितस्तु यत्नत**
**स्तथापि जापानिविसशिसकैः।**
**विनाशितं पत्रमतीव दुर्जनैर्न**
**लब्धमेतत्तु सुदेशसेविना।।** [6]
**स्वकीयकार्यं प्रविधातुमिच्छया**
**स्वयं हि जापानविरोधिचेष्टया।**
**सुसैन्यमेवं घटितं स्वकर्मणा प्रभावितं**
**कर्त्तुमतीव सज्जिताः।।** [7]

यमक अलंकारस्य रमणीयता द्योतिता –

**देशस्य चास्मज्जनता विपन्ना**
**स्वाह्वानमेवं प्रकरोति रौद्रम्।**
**सा चायते रक्तमपि स्वलोकान्**
**रक्तं हि रक्तं सकलप्रकारैः।।** [8]
**देशस्य चास्मज्जनता विपन्ना**
**स्वाह्वानमेवं प्रकरोति रौद्रम्**
**सा याचते रक्तमपि स्वलोकान्**
**रक्तं हि रक्तं सकलप्रकारैः (लाल, अनुराग)**
**लक्षण-अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः।**
**यमकं पादतद्भागवृति तद्यात्यनेकताम्।।** [9]
**आत्मानमेवं जनसेवकं तु मन्येऽहमस्माकमतीव तुष्टः।**
**एष स्वकार्ये विविधप्रकृष्टे**
**कर्त्तव्यक्षेत्रे सुसमाहितोऽस्मि।।** [10]

5 श्रीसुभाषचरितम् 7/85/30, उपमा अलंकार
6 श्रीसुभाषचरितम् 7/86/36, उपमा अलंकार
7 श्रीसुभाषचरितम् 7/87/41, उपमा अलंकार
8 श्रीसुभाषचरितम् 8/91/4, यमक अलंकार
9 9/183 – नव उल्लास, काव्य प्रकाश
10 श्रीसुभाषचरितम् 8/94/18, उपमा अलंकार

श्रेष्ठ स्वसेना सुनियोजिता स्याद्
देशं समुद्धर्तुमतीव योग्या।
तस्याः समक्षं सुमहद्धि कार्यं
स्वातन्त्र्यसंग्रामदिशि प्रकृष्टम्।। [11]

यद्वर्लिनस्य स्थित एव पुर्यां
तावत्स्वकार्यार्थमतीव हृष्टः।
दृष्टो हि तेनातिविशिष्टभावैः
स हिट्लरः कार्यविशेषहेतोः।। [12]

प्रस्थानकाले तु सुसैनिकान् सः
प्रोवाच सुस्पष्टमतीव हृष्टः।
लक्ष्यं तुचास्मद्विदितं हि सर्वैः
स्वशासनं भारतदेशमध्ये।। [13]

देशस्य चास्माकमतीव व्यग्रा-
स्ते प्रस्तुताः सन्ति विमुक्तिहेतौ।
स्वशक्तिसम्पन्नविदेशिनस्ते
जाताः सखायः सुविशिष्टरूपे।। [14]

एवं विनिश्चित्य महान् स नेता संवादमेवं प्रससार देशे।
समुत्सुका देशनिवासिनस्ते प्रसन्नतामातुरतीव तुष्टाः।। [15]

एतत्तु सर्वाधिकलाभहेतौ स्वकीयसाहाय्यमतीव शस्यम्।
साम्राज्यवादी हि वृटेनः परैस्तु साहाय्यमपेक्ष्यतेऽतः।। [16]

प्रवासिनो भारतवासिनस्ते नेत्रा सुभाषेण समानरूपे।
आहूय प्रोक्ता घटनाय शीघ्रं स्वीकयदेशस्य सुसर्वकारम्।। [17]

9/1 ।। पृ. 111, अनुप्रास अलंकार

अस्थायिनः कार्यमतीव रुच्या
स्वसर्वकारस्य चलेदवश्यम्।
तथैव कार्यं प्रभवेत्स्वकीयं
यथा जनाज्ञा भवतीष्टरूपा।। [18]

विश्वास एषोऽस्ति मम स्वकीय
लक्षद्वयं सैन्यमतीव योग्यम्।
कोटिद्वयं डॉलररूपमस्तमत्
स्वकीयकोषे भविता धनञ्च।। [19]

उद्घोषितं स्पष्टमतीव नेत्रा प्रचारका नैव वयं हि तेषाम्।
ब्रिटेनदेशस्य महद्रिपूणां मिथ्याप्रचारः क्रियते तथान्यैः।। [20]

अस्थायिरूपे घटितोऽपि सम्यक् स्वसर्वकारः क्षम एव जातः।
तत्रागते तस्य तु कार्यजातं सुव्यापकं जामतीव शीघ्रम्।। [21]

स्वकीयदेशस्य सुशासनस्य
ह्येकोनविंशात्मकभागजातम्।
स्वे स्वे विभागे पृथगेव सर्वं
लेखादिकार्यं समजायत स्वम्।। [22]

कायेन वाचा मनसा तथैव धनेन चातीव परिश्रमेण।
देशस्य सेव्यं विदधान एव
प्राणांश्च देशार्थमिमांस्त्यजेम।। [23]

तथापि चास्माकमतीव भक्ताः
स्वसैनिका देशपरायणा वै।
कदापि जाले न हि ते निवद्धाः
देशप्रिया नैव तु तद्धिरुद्धा।। [24]

सङ्घेऽस्मदीये स्वयमागताः स्थ
प्राप्तं भविष्यत्यतिमात्रपूर्णम्।
अन्नञ्च पामश्च यथेष्टरूप-
मतोऽस्मदीयं शरणं व्रजध्वम्।। [25]

अतो वयं पूर्णमनोरथेन स्वतंत्रतामाप्तुमितीव लग्नाः।
मृत्योर्भयं नापि मतं स्वमार्गे
देशस्य कल्याणधिया युताः स्मः।। [26]

11 श्रीसुभाषचरितम् 8/94/19, उपमा अलंकार
12 श्रीसुभाषचरितम् 8/96/26, उपमा अलंकार
13 श्रीसुभाषचरितम् 8/97/30, उपमा अलंकार
14 श्रीसुभाषचरितम् 8/130/54, उपमा अलंकार
15 श्रीसुभाषचरितम् 8/104/57, उपमा अलंकार
16 श्रीसुभाषचरितम् 8/168/68, उपमा अलंकार
17 श्रीसुभाषचरितम् 9/111/1, उपमा अलंकार
18 श्रीसुभाषचरितम् 9/112/5, उपमा अलंकार
19 श्रीसुभाषचरितम् 9/113/10, उपमा अलंकार
20 श्रीसुभाषचरितम् 9/113/37, उपमा अलंकार
21 श्रीसुभाषचरितम् 10/111/10, उपमा अलंकार
22 श्रीसुभाषचरितम् 10/125/14, उपमा अलंकार
23 श्रीसुभाषचरितम् 10/128/26, उपमा अलंकार
24 श्रीसुभाषचरितम् 10/130/33, उपमा अलंकार
25 श्रीसुभाषचरितम् 10/133/44, उपमा अलंकार
26 श्रीसुभाषचरितम् 11/136/8, उपमा अलंकार

बहिर्गता देशनिवासिनश्च सुमूल्यवन्तं समयं स्वकीयम्।
तं य पयेयुर्न वृथा प्रमादाद्यतो हि सोऽतीव महत्त्वपूर्णः।।[27]
आदेशपत्रं हि सुभाषनेतुरेवं प्रकारेण प्रचारितं तत्।
श्रुत्वा तु चास्माकमतीव जाताः
स्वदेशजाः सर्वविधिप्रसन्नाः।।[28]
सुभाषबोधस्तु विशिष्टरूपे नेतृत्वरूपे हि सुपूजितोऽभूत्।
नाम्नैव सोऽतीव महाप्रभावी जातः स्वकीये जनमानसे वै।[29]
आदेशमात्रं तु सुनायकस्य श्रुत्वा स्वकीयस्य पलायनस्य।
अग्रे प्रयाणार्थमतीव व्यग्रे सैन्ये तु कोलाहलमत्र जातम्।।[30]
ततोऽपि वर्षर्तुरतीव वेगात् स्वताण्डवं चातिभृशं चकार।
न वायुसैन्यस्य हि प्राप्य सेवां सेना स्वकीया विरता वभूव।।[31]
श्रुत्वा तु सर्वे जननायकाश्च स्वरक्तदानाय भृशं जगर्जुः।
वीराङ्गनास्तत्र तु तैर्हि सङ्गे स्वशोणितं दातुमतीव हृष्टाः।[32]
निशम्य ते नेतुरतीव तुष्टा प्रोत्साहयुक्तं वचनं हितं वै।
गर्जन्त एवातिसुहर्षितास्तु हस्ताक्षरं कर्तुमतीव हृष्टाः।।[33]
एवं च तत्र वनिताः स्वयमेव रक्तं
दत्त्वातिहर्षमपि पुण्यकृतं त्ववापुः।
त्यक्त्वा हि ते सकलमोहमतीव सर्वे
तुष्टाः स्वकार्यहितमेव सदा प्रवृत्ताः।।[34]
स्त्रीसैनिकानां रणहेतुचेष्टा प्रकृष्टरूपेण विचारणीया।
तासां तु कर्त्तव्यमतीव युक्त-
मासीच्चिकित्सालयसेवनं हि।।[35]

27 श्रीसुभाषचरितम् 11/139/21, उपमा अलंकार
28 श्रीसुभाषचरितम् 10/140/28, उपमा अलंकार
29 श्रीसुभाषचरितम् 10/141/29, उपमा अलंकार – साधर्म्यपमाभेदे। काव्य प्रकाश 10/87 दशम उल्लास
30 श्रीसुभाषचरितम् 12/156/35, उपमा अलंकार
31 श्रीसुभाषचरितम् 12/157/37, उपमा अलंकार
32 श्रीसुभाषचरितम् 10/158/41, उपमा अलंकार
33 श्रीसुभाषचरितम् 10/158/43, उपमा अलंकार
34 श्रीसुभाषचरितम् 10/156/46, उपमा अलंकार
35 श्रीसुभाषचरितम् 13/160/1, उपमा अलंकार

आवेदनं तत्र सहैव ताभिर्हस्ताक्षरं चैत्र कृतं स्वकीयम्।
सैन्याधिकारेऽपि तथैव लग्न-
स्त्रीभिश्च सर्वाभिरतीव शुभ्रम्।।[36]
यदा तु तासामधिका हि सङ्ख्या
जाता तदा ते त्वधिकारिलोकाः।
संयोजयामासुरतीव पुष्टं
झांसीस्थराज्ञीति तदीयसैन्यम्।।[37]
सैन्यस्य चास्यापि हि युद्धभूमौ
संप्रेषणार्थं विजयाय शीघ्रम्।
सुनिश्चयो जात इतीव बुद्ध्वा
ततः प्रसन्नाः महिलाः समस्ताः।।[38]
सेवा हि तासां महिलाजनानां सदैव
चास्माकमतीव पूज्या।
देशस्य हेतौ मरणं स्वकीयं
प्रेयश्च ताभ्यः सकलप्रकारैः।।[39]

अनुप्रास–अलंकारे नकारस्य छटा दर्शनीया।

कोषे गते तद्धनमेव सर्वं स्वातन्त्र्ययुद्धाय तु भारतस्य।
एकेन माल्येन सुसञ्चिताभूल्लक्षात्मिका नूनमपि स्वमुद्रा।।[40]
सभावसाने धनलाभहेतौ सुमाल्यमूल्यार्थमपेक्षितं तु।
लक्षाधिकं तद्दशलक्षभूतं मूल्यं पुनर्वै सुविचार्य रौप्यम्।।[41]
स्वाधीनतां प्राप्तुमतीव भक्त्या
शस्त्रास्त्र सज्जैः सकलैर्हि भाव्यम्।
ब्रिटेनदेशीयजनांस्तथान्यान्
निः सार्य सर्वान् जयलाभकामैः।।[42]

36 श्रीसुभाषचरितम् 13/162/8, उपमा अलंकार
37 श्रीसुभाषचरितम् 13/163/13, उपमा अलंकार
38 श्रीसुभाषचरितम् 13/165/14, उपमा अलंकार
39 श्रीसुभाषचरितम् 13/165/20, उपमा अलंकार
40 श्रीसुभाषचरितम् 13/167/28, उपमा अलंकार
41 श्रीसुभाषचरितम् 13/167/29, उपमा अलंकार
42 श्रीसुभाषचरितम् 13/172/50, उपमा अलंकार
43 श्रीसुभाषचरितम् 14/174/28, उपमा अलंकार

सैन्ये तु तस्मिन्नशनं न लब्धं
घासेन तृप्तिर्हि बुभुक्षितानाम्।
जाता तदानीं स्वनियोगेकार्ये
त्यक्तं च तैर्देशहिताय सर्वम्।। [43]

अन्नञ्च पानञ्च विना त्वनेके
स्वसैनिकाः मृत्युमुखे प्रविष्टाः।
ये केऽवशिष्टयभया हि जाताः
स्वशत्रुपक्षेऽपि गता अनेके।। [44]

सर्वैः स्वमित्रैर्विनयेन युक्तैः
सम्प्रार्थितो वैककराजधानीम्।
जगाम सैन्यस्य हि कार्यसिद्ध्यै
सन्त्यज्य रङ्गूनमतीव खिन्नं।। [45]

अनेके जनाः प्राप्य जन्म स्वदेशे
न कुर्वन्ति काञ्चित्तदर्श तु सेवाम्।
वृथा जन्म तेषां जनानां तु चात्र
सदैवातिपूज्यो नरो देशभक्तः।। [46]

44 श्रीसुभाषचरितम् 14/177/16,
छेकानुप्रास अलंकार-उप नागरिका
45 श्रीसुभाषचरितम् 14/183/42, उपमा अलंकार
46 श्रीसुभाषचरितम् 15/189/16, अर्थान्तरन्यास अलंकार

पिता तस्य धन्यः सुमाताऽपि धन्या
ययोः पुत्ररूपे तु जातः सुभाषः।
सदा पूजनीयौ सुबन्धावुभौऽसौ
सुसौभाग्यतो लभ्यते योग्यपुत्रः।

स्वनेतुः प्रसादात्तथा दैवयोगात्
भवेद्भारते भारतं सर्वकालम्।
जनाः संस्कृतास्युस्तथा वैरभावं
परित्यज्य सर्वे भवेयुः सुदक्षाः।। [47]

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।। [48]

मही चात्र सर्वप्रकारेण पूर्णा
फलैः, सज्जिता पुष्पयुक्ताश्च वृक्षाः।
स्वतंत्रा हि भूमिः सदा सर्वपूज्या
स्वनेतुः प्रभावात्सदा लोकमान्यः।। [49]

प्रोफेसर साहित्य-संस्कृतम्
श्री सोमनाथ संस्कृत विश्वविद्यालय बेवारल
जिला-गौर, सोमनाथ, गुजरात

47 श्रीसुभाषचरितम् 15/192/31, (भारते भारतं)
48 काव्य प्रकाशः
49 श्रीसुभाषचरितम् 15/192/31, (भारते भारतं)

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

# बीजमन्त्राणामर्थः महत्त्वमौचित्यञ्च

❑ रजनीश कुमार बारहठः

यथा प्रत्येकमपि वृक्षस्य बीजे सूक्ष्मस्वरूपे तस्य वृक्षस्य स्वरूपम् अन्तर्निहितं भवति। तस्य बीजस्य वपने सिञ्चने च जाते एको विशालवृक्षो भवति, तथैव सर्वस्मिन् बीजमन्त्रे तस्य देवविशेषस्य स्वरूपम् अन्तर्निहितं भवति। अतो मन्त्रः जपानुष्ठानसाधनाद्वारा तत्तद्-देवसाक्षात्कारं कारयितुं शक्नोति।

समुदेतीयं जिज्ञासा यत् किं नाम एते मन्त्राः? किञ्च एतेषां स्वरूपम्? किञ्चैतेषामौचित्यं महत्त्वञ्च? प्रश्नानामेतेषां समाधाने किमपि स्पष्टवर्णनं तु न प्राप्यते यतो हि एषः विषयः गोप्यः परिभाषागम्यः तन्त्रवर्णनीयश्च। अयम् अनुभवगम्यः साधनागम्यश्च वर्तते। तथापि उपलब्धतथ्यानि सामान्यनिष्कर्षान् शास्त्रपरम्पराञ्च विचार्य अस्मिन् विषये शोधरूपे संक्षिप्तं विवेचनं प्रस्तूयते।

वस्तुतः किमपि एतादृशमक्षरं न भवति यत् मन्त्रो न भवति, किमपि मूलमेतादृशं न भवति यत् औषधिर्न स्यात्, केवलं तस्य उचितज्ञानस्य आवश्यकता भवति-

**अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्**

एवमेव महाभाष्ये महर्षिपतञ्जलिनोक्तम्- ''एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके च कामधुग् भवति'' अर्थात् एक एव शब्दः सम्यग्रूपेण ज्ञातोऽभिज्ञातो मन्त्रसाधनाप्रयुक्तो कामधेनुवत् साधकस्य सम्पूर्णमनःकामनाः पूरयति। एवमेव यदा कोऽपि साधुशब्द एव एतादृशः सशक्तो भवति तर्हि विधिवत्प्रयुक्तानां मन्त्राणां बीजमन्त्राणां च महिमा तु अनिर्वचनीय एव। मन्त्रो बीजमन्त्रो वा साधारणशब्दो न भवति अपि तु दिव्यशक्तेः साधको वाचकश्च भवति। एते मन्त्राः कस्यचित् देवविशेषस्य स्वरूपस्य बोधं कारयन्ति। एतेषु मन्त्रेषु बीजमन्त्रेषु च प्रामुख्येणायं भेदो भवति यत् बीजमन्त्राः मन्त्राणां संक्षेपणं भवति। एवं मन्त्राणामपेक्षया इतोऽपि सशक्ता ऊर्जस्विनश्च भवन्ति। प्रत्युत शब्दब्रह्म एव भवति। यथा 'ॐ' इति बीजमन्त्रस्तस्य परमतत्त्वस्य परमात्मनो वाचको बोधको वा भवति। 'तस्य वाचकः प्रणवः' -योगसूत्रम् १/२७। तथैव सर्वे बीजमन्त्राः परमशक्त्या कयाचित् देवशक्त्या वा सम्बद्धा भवन्ति। एवमेव एते बीजमन्त्राः परमतत्त्वसहितेन सम्पूर्ण-ब्रहाण्डस्य प्रतिनिधित्वं कुर्वन्ति। तथापि यतो हि अर्थं विना जपस्य सम्पूर्णता न भवति ''मन्त्रार्थभावनं जपः'' -मन्त्रयोगसंहिता। अत एतेषां बीजमन्त्राणां कोऽर्थ इति जिज्ञासा पुनः समुदेति अथ चैवमधीयते यत् एतेषां बीजमन्त्राणामर्थो ज्ञानातीतो वर्णनातीतो वा भवति। तर्हि अस्य समाधानं किं स्यात्? फलतोऽस्य समाधाने अस्माकं मनीषिभिः मन्त्राणां षड्विधा अर्थाः प्रतिपादिताः - (१) वाच्यार्थः, (२) भावार्थः, (३) लौकिकार्थः, (४) सम्प्रदायार्थः, (५) रहस्यार्थः, (६) तत्त्वार्थः इति। योगसूत्रभाष्ये च एतदेवोक्तं यत् 'सति तात्पर्ये सर्वे सर्वार्थवाचकाः' अर्थात् मन्त्रस्य सर्वाण्यक्षराणि समस्तार्थानां वाचकानि भवन्ति। किन्तु यदा कस्मिंश्चित् एकस्मिन् समये एते मन्त्राः केनचित् देवविशेषेण कयाचित् शक्तिविशेषेण, सम्प्रदायानुष्ठानेन पुनश्चरणविशेषेण वा सम्बद्धा भवन्ति, तदा कस्यापि निश्चितार्थस्य वाचका बोधका वा भवन्ति तत्रापि च तेषां षडर्थेषु केचिदेवार्थाः अस्माभिः अवबुध्यन्ते, अधिगम्यन्ते अनुभूयन्ते च। एवमेव बीजमन्त्राणां पूर्णस्वरूपज्ञानं तु वर्णनातीतमेवास्ति। वाच्यार्थं विहाय अवशिष्टसर्वार्थानामवाप्तिं साधकः साधनया गुरुकृपया देवकृपया वोन्नयनेन क्रमशः उत्तरोत्तररूपेण लभते। बीजमन्त्राणामर्थसन्दर्भे मन्त्रशब्दस्य धातुगतार्थो भवति- 'गुप्तपरिभाषणम्'। यथा बीजगणितशास्त्रे बीजाङ्कानाम् आधारेण विविधराशीनां मानं सम्पाद्य विभिन्नगणनां समाधानं च क्रियते। एते बीजाङ्काः विभिन्नसंख्यानां वाचका भवन्ति। एवञ्चैते बीजमन्त्रा अपि देवतासम्प्रदायप्रयोगाधारेण निश्चितं वाच्यार्थं प्रतिपादयन्ति। परञ्चोल्लेखनीयमस्ति यत् बीजमन्त्रो निश्चितमेकम् अर्थं प्रतिपादयन्नपि केवलं एतावदेव सीमितो न भवति प्रत्युत देवतासम्प्रदायप्रयोग-परिवर्तनेन तस्मिन्नर्थवैविध्यमागच्छति। यथा योगः शब्दः गणिते 'राशीनां योगार्थे' भवति, गीतायां 'कर्मसु कुशलता' भवति, योगदर्शने च 'चित्तवृत्तिनिरोधो' भवति, ज्योतिषे तु 'पञ्चाङ्गस्य

एकभागः' इति अर्थो भवति। एवमेव बीजमन्त्रा अपि विविधदेवीदेवताभिः सह विभिन्नसम्प्रदायानुष्ठानपुनश्चरणेषु प्रयुक्तेषु सत्सु विभिन्नार्थानां वाचका भवन्ति। तथापि मन्त्राणां बीजानां बहुसम्मतः परम्परागतो वाच्यार्थो भवति यस्मिन् विषये आगमग्रन्थेषु वर्णनमुपलभ्यते। केषाञ्चन प्रमुखबीज-मन्त्राणां परम्परागतः प्रचलितवाच्यार्थः प्रस्तूयतेऽत्र –

ॐ = एष मन्त्रः परमात्मनः सूचकः वाचकः वा अस्ति। अस्मिन् मन्त्रे 'अ', 'ऊ', 'म्' एते वर्णाः सम्पूर्णब्रह्माण्डस्य प्रतिनिधित्वं कुर्वन्ति। महर्षिः पतञ्जलिरपि एतं ब्रह्मवाचिनं कथयति 'तस्य वाचकः प्रणवः।' गीतायामपि ॐ अक्षरब्रह्मरूपे प्रतिपादितम् अस्ति– प्रणवः सर्ववेदेषु शब्दः खं पौरुषं नृषु(७.८)। उपनिषत्सु अपि एतस्य महत्त्वस्य निरूपणं बहुत्र वर्णितमस्ति।

ऐं = एतद् वाग्भवबीजं सरस्वतीबीजं वा भवति। अत्र ऐकारः सरस्वत्याः वाण्याः वा वाचको भवति, नादः जगन्मातुः बिन्दुः दुःखहरणस्य प्रतीकं भवति। इत्थम् ऐं इति बीजस्य अर्थ भवति– जगन्माता सरस्वती अस्माकं दुःखान् दूरीकुर्यात्। एवमेव देव्यथर्वशीर्षेऽपि स्वीकृतम्, तत्रापि ऐङ्कारः वाक्स्वरूपे स्वीकृतम्। सिद्धकुञ्जिकास्तोत्रे ऐङ्कारी सृष्टिरूपायै इति वर्णितमस्ति।

ह्रीं = एतद् मायाबीजमस्ति। अत्र ह= शिवः, र्= प्रकृतिः, नादः= विश्वमाता, बिन्दुः= दुःखहरणम्। इत्थं ह्रीं इति बीजस्यार्थो भवति शिवयुक्ताद्या जननी अस्माकं दुःखान् दूरीकुर्यात्। एतदेव बीजमन्त्रं देवीप्रणवस्वरूपे स्वीकृतम्। श्रीदेव्यथर्वशीर्षेऽस्मिन् विषये उक्तम्–

**वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम्।**
**अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम्।।**
**एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः।**
**ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः।।**

(देव्यथर्वशीर्षम् १८.१९)

अर्थात् वियत्= आकाशम् (ह) ईकारयुक्तः वीतिहोत्र=अग्नि (र) सहितम् अर्धचन्द्रः (ँ) इत्येतैरलङ्कृतं यत् देव्याः बीजम् अस्ति तत् सर्वान् मनोरथान् पूरयति। एवं विधम् अस्यैकाक्षरशब्दब्रह्मस्य ज्ञानाम्बुराशयः मुनयः ध्यानं कुर्वन्ति।

सिद्धकुञ्जिकास्तोत्रे 'ह्रीं' इति बीजमन्त्रः जगत्पालिकास्वरूपे स्वीकृतोऽस्ति– "ह्रीङ्कारी प्रतिपालिका।" यदि वयं वैज्ञानिकरूपेण विश्लेषणं कुर्मः तर्हि प्राप्यते यत् ह्रीं इति बीजमन्त्रे कण्ठ–तालु–मूर्धा–नासिका–इति चतुर्णाम् उच्चारणस्थानानां प्रयोगो भवति।

क्लीं = एतद् कामबीजमस्ति कृष्णबीजं कालिकाबीजं वा। अत्र क= योगान्तः श्रीकृष्णः ल=दिव्यतेजः, ई=योगेश्वरी योगेश्वरः वा, बिन्दु=दुःखहरणम्। एवं प्रकारेण अस्य बीजस्य अर्थः भवति– योगेश्वरी अस्माकं दुःखान् दूरीकुर्यात् अथवा योगेश्वरः श्रीकृष्णः अस्माकं दुःखान् दूरीकुर्यात्। एतद् बीजं योगेश्वरस्य विष्णोः महामायायाः महालक्ष्म्याः वा प्रतीकरूपं वर्तते।

इत्थम् ॐकारयुक्ता एते बीजमन्त्रा (ऐं, ह्रीं, क्लीं) महासरस्वत्याः, महालक्ष्म्याः महाकाल्याश्च प्रतिनिधित्वं कुर्वन्ति। चेद्वयमेतेषां बीजमन्त्राणां वैज्ञानिकविश्लेषणं कुर्मः तर्हि प्राप्यते–

**ॐ = अ, ऊ, म्**  **ऐं = अ+ई=ऐ+म्**
**ह्रीं = ह+र्+ई+म्**  **क्लीं = क्+ल्+ई+म्**

मन्त्रेष्वेतेषु उच्चारितानां वर्णानामुच्चारण-स्थानाधारेण भाषाशास्त्रीयविवेचनम् एवमस्ति–

| **स्थानम्** | | **वर्णाः** |
|---|---|---|
| कण्ठः | = | अ, ह क् |
| तालुः | = | ई |
| मूर्धा | = | र् |
| दन्ताः | = | ल् |
| औष्ठौ | = | म् |
| नासिका | = | म् |

इत्थमेतेषु बीजमन्त्रेषु सर्वेषामुच्चारणावयवानां प्रयोगो दृश्यते। एतेषाञ्चोच्चारणेन विशिष्टध्वनिप्रभावः प्रभूयते। एवमेव 'चामुण्डायै विच्चै' इति मन्त्रेऽपि सर्वेषान् उच्चारणस्थानां प्रयोगः विशिष्टध्वनिप्रभावश्च वर्तते।

शाक्तमतस्य मूलबीजमन्त्रः – "ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे"

अयं मन्त्रो शक्तेरुपासनायाः मुख्यमन्त्रोऽस्ति। मन्त्रे एतस्मिन् अनेकानि बीजानि सन्ति येषु ऐं, ह्रीं, क्लीं इति बीजानाम् अध्ययनं विश्लेषणं च कृतमेव। इत्थम् एतस्य महामन्त्रस्य आशयः भवति परब्रह्मस्वरूपा महासरस्वतीस्वरूपा, महालक्ष्मीस्वरूपा, महाकाली-स्वरूपा चण्डमुण्डदैत्यविनाशिनी या देवी अस्ति तस्यै नमः इति।

सिद्धकुञ्जिकास्तोत्रेऽपि अयमेव आशयो वर्तते-

**ऐङ्कारी सृष्टिरूपायै ह्रीङ्कारी प्रतिपालिका।**
**क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते।।**
**चामुण्डा चण्डघाती च यैकारी वरदायिनी।**
**विच्चै चाभयदा नित्यं नमस्ते मन्त्ररूपिणी।।**

देव्यथर्वशीर्षे एतन्महामन्त्रस्य विवेचनमेव-मस्ति-

**वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम्।**
**सूर्योऽवामश्रोत्रबिन्दुसंयुक्तष्टात्तृतीयकः।**
**नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः**
**विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः।।**

अर्थात् वाणी= ऐं, माया= ह्रीं, ब्रह्मसूकाम=क्लीं, ततः षष्ठं व्यञ्जनम्= च, तदपि वक्त्रयुक्त आकारयुक्तो वा= चा, सूर्यः=म, अवामश्रोत्रः=उ, बिन्दुसंयुक्त='' टा तृतीयकः= ड, नारायणेन सम्मिश्रः= डा, वायुः=य, तदपि अधरयुक्=यै विच्चे च। अयं नवार्णमन्त्र उपासकानां कृते आनन्ददः ब्रह्मसायुच्यदाता च वर्तते।

एवमेव अयं महामन्त्रः सम्पूर्णसप्तशत्याः साररूपः अस्ति। विविधस्वरूपायाः तस्याः आद्याशक्तेः वाचको बोधको वा वर्तते। अयमेव मन्त्रः तस्याः भगवत्या साधनायां प्रारम्भादासाक्षात्कारं सोपानभूतं वर्तते।

**अन्यबीजमन्त्राः**

श्रीं = श्रीबीजं महालक्ष्मीबीजं वा। श्= महालक्ष्मी, र्= धनसम्पत्तिः प्रकृतिर्वा, ई=जगन्माता, बिन्दुः= दुःखहरणम्। अर्थात् धनसम्पत्याः अधिष्ठात्री जगज्जननी महालक्ष्मी अस्माकं दुःखान् दूरीकुर्यात्।

क्रीं = कालबीजं कर्पूरबीजं वा। क्=काली, र्=प्रकृतिः, ई=महामाया, नाद=विश्वमाता, बिन्दुः=दुःखहरणम्। अर्थात् जगन्माता महाकाली अस्माकं दुःखान् दूरीकुर्यात्।

दुं = दुर्गाबीजम्। द्=दुर्गतिनाशिनी दुर्गा उ=सुरक्षा, बिन्दुः= दुःखहरणम्। अर्थात् भगवती दुर्गा अस्माकं दुःखान् दूरीकुर्यात्।

स्त्रीं = वधूबीजं ताराबीजं वा। स्=दुर्गा, त्=तारा, र्=प्रकृतिः, ई=महामाया, नाद=विश्वमाता, बिन्दु=दुःखहरणम्।

हौं = प्रसादबीजं शिवबीजं वा। ह=शिवः ऊ=भैरवः, बिन्दुः= दुःखहरणम्।

हूँ = वर्मबीजं कूर्चबीजं वा। ह=शिवः ऊ=भैरवः, बिन्दुः= दुःखहरणम्।

हं = हनुमद्बीजम्। ह= हनुमान् अं- संकटमोचनम् दुःखहरणं वा।

गं = गणेशबीजम्। ग्=गणेशः, अ= विघ्ननाशकः।

**सिद्धकुञ्जिकास्तोत्रानुसारेण बीजमन्त्राणि**
**ऐं = सृष्टिस्वरूपिणी, ब्रह्माणी, सृष्टिकर्त्री वा।**
**ह्रीं = सृष्टिपालिका, वैष्णवी, सृष्टिभर्त्री वा।**
**क्लीं= कामरूपिणी, पुनः बीजहेतुस्वरूपा।**
**चामुण्डायै= चामुण्डा=चण्डमुण्डविनाशिनी, यै= वरदात्री।**
**विच्चै= नित्या अभयदात्री।**
**धां धीं धूं= धूर्जटी शिवा।**
**वां वीं वूं= वागीश्वरी।**
**क्रां क्रीं क्रूं= कालिकास्वरूपिणी।**
**शां शीं शूं= शान्तिकारिणी, कल्याणकारिणी।**
**हुं हुं= हुङ्कारस्वरूपिणी।**
**जं जं जं= जम्भनादिनी।**
**भ्रां भ्रीं भ्रूं = भैरवरूपिणी भद्रा।**
**पां पीं पूं - पार्वतीस्वरूपिणी पूर्णा।**
**खां खीं खूं= खेचरी**
**सां सीं सूं= सप्तशतीस्वरूपिणी देवी।**

एवमेव विविधबीजमन्त्राणां तन्त्रागम-शास्त्रानुसारमर्थोऽनुसन्धेयः। बीजमन्त्राणां शब्दार्थज्ञाते सति क्षिप्रं चमत्काराः साधनायां सम्भवन्ति इत्यत्र न संशयावसरः।

**शोध-छात्रः, संस्कृत विभागः,**
**राजस्थान विश्वविद्यालयः, जयपुरम्**

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### आस्तिकहृत्सम्राट- नव्यन्याय- धुरन्धर-उदयनाचार्यः

न्यायविद्याब्धिनिष्णातकाध्यापका-,
सारतर्काग्रघातांकवीक्षाविधेः।
शासकः भासुरः शेमुषीमानयम्,
आहता भारती भारते हा कथम्।। 213।।

ब्रह्मनिष्ठोऽपि यो सद्गृही मैथिलः,
बौद्धशाखिप्रशाखाखगोन्मूलकः,
नास्तिकेभासृगाशो मृगेशो मृजा,
हा कथं भारते भारती आहता।। 214।।

आस्तिकारण्यकान्तारवृक्षावली-
मंजरीसौरभालीढमत्तोऽलिकः।
भक्तिमानेष तन्नौति रक्तं शिवे,
आहता हा कथं भारती भारते।। 215।।

### कविपरिचयः

वैद्यनाथो गुरुर्योऽद्य नैयायिकः,
कृष्णभक्तोऽद्वितीयस्सुवैयाकृतः।
द्वैतवेदान्तविद्यानदीष्णस्तु सः,
गाहते नैकशास्त्राम्बुधौ वाधुना।। 216।।

व्याकृती मोदते पाणिनीयाष्टके,
द्वैतवेदान्तविद्याचणाग्रेचरः।
हेतुशास्त्रे पटुर्मे गुरुर्नामतः,
व्राजकं तं महेशन्नुमो मैथिलाः।। 217।।

स्रष्टुराद्या कृतिर्भारतीयं श्रुति-
र्याजुषे तत्र नित्यं गुरुर्मज्जति।
गोडशे कृष्णनामा यशस्वी सुधी-
स्तं समाम्नायविज्ञं विनौमि प्रति।। 218।।

लब्धजन्मा विहारोत्तरे भूतले,
जानकीजन्मभूमिस्थले पाविते।
याज्ञवल्क्याष्टवक्रादिभिर्वन्दिते,
रामनारायणः काव्यमास्वादते।। 219।।

भ्रातरो मे त्रयस्स्युर्नु तिस्रः प्रियाः,
प्रीणयन्तः स्वसारोऽपि सत्यं हृदा।
शान्तिकामः पिता प्रेष्ठपूर्णा प्रसूः,
शैशवात् स्निह्यतः प्रेरयन्तौ गिरम्।। 220।।

आत्मजो मे तनूजैकलश्चैकला,
सत्यमेषा नता दीर्घिका विश्रुतिः।
नम्ररत्नाभ एषाशिषो बालकः,
धूर्जटेः सम्प्रसादाद्विलब्धौ च तौ।। 221।।

वर्तते धर्मजाया ममोषाभिधा,
बौद्धभूजाधुना माघभूमिसुता।
संयतोपस्करा काव्यशास्त्रं च या,
पापठीतीति सागारकार्यार्थिका।। 222।।

व्याख्याता ( संस्कृतम् )
राजकीयकल्याणमहाविद्यालयः, सीकरम्

# अश्वघोषस्य महाकाव्येषु जीवन-मूल्यानि

❑ विश्नोईभंवरलालः

मनुष्यस्य जीवनमुद्देश्यपूर्णमस्ति। एषः उद्देश्यं विना पशुवत् जीवनं न जीवति। विवेकशीलता एव एतयोः भेदः वर्तते इत्युक्ते बुद्धिः पार्थक्यं स्पष्टयति। बुद्धयाधारेण प्राप्तं ज्ञानतत्त्वं यथार्थमूल्यमिति अभिधीयते।

निःश्रेयसाभ्युदयौ मनुष्यजातेः उद्देश्यानां पराकाष्ठा भवति। यदा आरभ्य मनुष्यः सुखमयं जीवनं जीवितुं यतते तदा आरभ्यैव जीवनमूल्यानाम् अस्तित्वं दृश्यते एवञ्च एतेषामितिहासक्रमस्य एव आरम्भः जातः। सुखमयं जीवनं नाम सुखप्राप्त्यवसरे अन्यस्य अहितं न स्यात्। सन्दर्भेऽस्मिन् मानवः केवलं स्वाधिकाराणामेव चिन्तनं न कुर्यात् अपितु कर्त्तव्याचरणमपि स्वस्थ-मानसिकचिन्तनेन सह कुर्यात्। मनुष्यः एकाकी भवतु वा समूहे तस्य मनसि परिवारस्य समूहस्य समाजस्य जनमहाजनपदयोः राष्ट्रस्य वा कल्पना आगता इत्युक्ते यदा आरभ्य एतादृशी भावना जायमाना आसीत् अनया सह सः सात्विकव्यावहारिक-नैतिक मूल्यानां दृढ़ीकरणमपि अकरोत्। यदा मनुष्य जातेः जीवनविकाससन्दर्भमूल्यानां चिन्तनमारब्धं तदा साध्वा साधु-उचितानुचित-सम्यक्-असम्यक्-इति अवधारणा विकसिता जाता। जीवन-मूल्यानां निर्धारणे सकारात्मक-नकारात्मक इति भावद्वयस्य भूमिका स्पष्टाभवत्। व्याख्याव्युत्पत्त्यर्था-धारेण पाश्चात्यभारतीययोः साहित्यपरम्परायां जीवन-मूल्यानार्थ-भेदः कदाचित् भवितुं शक्नोति परं बुद्धिवादिविचारधारा द्वयस्यापि मूल्यनिरूपणस्याधारः अन्तंः करणवादः एवासीत्-

**सन्देहपदेषु वस्तुषु प्रमाणन्तःकरणप्रवृत्तयः**

**( अभि. 1/19 )**

**नासतो विद्यते भावो नाभावो विद्यते सतः।**

**( श्रीमद्भगवद् गीता 2/16 )**

देशकालसामाजिकराजनैतिकार्थिकभौगोलिक-परिस्थितिवशात् जीवनमूल्येष्वांशिंकवैविध्यं द्रष्टुं शक्यते परं एतेषां मूल्यानां वास्तविकं लक्ष्यं निखिल-मनुष्यजातेः कल्याणमेव। एतदर्शमूल्यानामेतेषा-माध्ययनावसरे केवल विषय-कल्पना न स्यात् अपितु सम्पूर्णमानवजातेः अनुशीलनं भवेत्।

ज्ञानविज्ञानस्य सुदीर्घपरम्परायां स्वज्ञानराशिभिः बहवः मनीषिणः विद्वांसश्च मानवीयजीवनमूल्यानामभि-वद्धिं कृतवन्तः। क्रमेऽमन् प्रन्थेषु वेदाः उपनिषदः पुराणानि दर्शनग्रन्थाः काव्यानि नाटकानि इत्यादयः जीवनमूल्याभिवृद्धयै एते प्रमुखाः आसन्। कालिदासः भारविः हर्षः वेदव्यासः वाल्मीकिः बाणभट्टः विवेकानन्दः डॉ. राधाकृष्णन् महात्मागांधीअरस्तुप्लेटो-दांतपैट्रार्कबोकेसियोरेबेलामान्टेनचौसरटामसमूरस्पेन्सर -शेक्सपीयरसर्वाण्टेजइरैस्मसइत्यादयः प्रमुखाः विचारकाः आसन् ये जीवनमूल्यदर्शनं प्रतिपादितवन्तः। एतेषु दार्शनिक विचारकेषु मूर्धन्यचिन्तकः मानवीयमूल्यप्रतिष्ठापकः कविश्रेष्ठः अश्वघोषः अन्यतमः आसीत्। अश्वघोषस्य जीवनचरितं काव्यस्पन्दनञ्च जीवनविकासाय अध्येतव्यम्।

बौद्धसंस्कृतेः मतानुसारं ताम्रयुगीनसिन्धुउपत्यका संस्कृतेः भ्रमणशीलानां आर्याणां वैदिक:कर्मकाण्ड-कालतः परिव्राजकानां कालपर्यन्तसमागमः एकां विशिष्टां संस्कृतिं सूचयति आर्याणां द्विविधजनैः सहसम्पर्कः नूतनायाः संस्कृतेः सर्वोत्तमं लक्षणमासीत्। एतस्यां सस्कृतौ सिद्धार्थः गौतमः जातः। अस्यां संस्कृतौ बौद्ध वाङ्मयस्य प्रारम्भिकविद्वत्सु विद्वत्पुंगवः महाकविः अश्वघोषः आसीत्।

जीवनमूल्यानां भारतीयपरम्परायां चिन्तनशील-मनुष्यजातेः सर्वश्रेष्ठा, सर्वजनहितायवहा दृष्टिः लोकतान्त्रिकजीवनमूल्यानां स्थापनं जीवनयापनस्य व्यवहारिकः नैतिकश्च दृष्टिकोणः पुरुषार्थचतुष्ट्यं, श्रेयस्-प्रेयस् इति व्यवस्था रामादिवत् धर्मानुकूल-आदर्शसमाजस्य मान्यता, अतिथि-सत्कारः, सदाचारः, शिष्टाचारः, संस्कार-परम्परा, शासने लोकाराधनायाः प्रतिष्ठा इति मूल्यपरकतात्त्विक चिन्तनानि अश्वघोषेण स्वसाहित्ये परिषोषितानि। अश्वघोषस्य साहित्ये एतानि तत्त्वानि मूर्तरूपेण साक्षात् अस्माभिः द्रष्टुं शक्यते। अस्माकं महत् सौभाग्यमिदं यत् एतादृशानि जीवनमूल्यानि अवश्वघोषस्य साहित्ये अस्माभिः, दृष्टानितैः, मूल्यैः जीवने ऊर्जायाः नावीन्यं सञ्चारितम्। जीवने भावकुसुमस्य प्रस्फुटीकरणमपि कृतम्। जीवन-मूल्यरूपेण एतानि भावकुसुमानि सन्ति-सम्यकज्ञानं, सत्यम् अहिंसा प्राणिनः प्रति मैत्रीभावः इत्यादीनि। एतानि मूल्यानि वर्तमानसन्दर्भे बहु प्रांसङ्गिकानि सन्ति-

**अतः परं तत्त्वपरीक्षणेन मनोदधात्यास्रवसङ्क्षयाय।**
**ततो हि दुःख प्रभृतीनि सम्यक्चत्वारि सत्यानि**
**पदान्यवैति।।**

**( सौन्दरनन्दम् 3/26 )**

**बाधात्मकं दुःखमिदं प्रसक्तं दुःखस्य हेतुः**
**प्रभवात्मकोऽयम्**
**दुःखक्षयो निः सरणात्मकोऽयं त्राणात्मकोऽयं**
**प्रशमाय मार्गः।।**

**( सौन्दरनन्दम् 4/26 )**

भगवता बुद्धेन देशस्य नराणां नारीणां च समक्षं नैतिकचेतना प्रतिष्ठापिता। मर्यादापुरूषोत्तमस्य योगेश्वरकृष्णस्य च अवतारानतरं बहूनि वर्षाणि जातानि कालानन्तरं शनैः शनैः जनानां मनसि वास्तविकं धर्मं प्रति अरूचेः भावः अवर्धत। अधर्मः धर्मरूपेण अमन्यन्त। जनेषु प्राणिहिंसायाः भावः चौर्यं कामव्यसनं मद्यपानं, अधंविश्वासश्च एतादृशानि अमूल्यानि उच्चस्तरे अन्तर्भूतानि अभवन्। जातिवादः इति संकटः सर्वत्र प्रसरितः। धार्मिकाः जनाः न्यूनाः अभवन्। अधार्मिकैः जनैः दुष्कृत्यानि कृतानि तैः कुकृत्यैः जनाः त्रस्ता अभवन्। कालेऽस्मिन् जीवनमूल्यानां सरंक्षकः महापुरूषः गौतमबुद्धः आसीत्-

**कृष्टादिभिः कर्मभिरर्दितानां कामात्मकानां**
**च निशम्य दुःखम्।**
**स्वास्थ्यं च कामेष्वकुतूहलानां कामान् विहातुं**
**क्षममात्मवद्भिः।।**

**( बुद्धचरितम् 11/20 )**

महात्माबुद्धस्य मूल्यसंरक्षणं अश्वघोषेण

सर्वत्रप्रसारितम्। बुद्धस्य मानसिकीं भावनाम् अवगन्तुं अश्वघोषः सर्वाधिकं साफल्यं प्राप्तवान्। मूल्यह्रास-विषयकपीड़ां सम्यक्तया ज्ञातवान्-

**सद्वाप्यसद्वा विषमिश्रमन्नं यथा**
**विनाशाय न धारणाय।**
**लोके तथा तिर्यगुपर्यधो वा दुःखाय**
**सर्वं न सुखाय जन्म।।**

**( सौन्दरनन्दम् 9/16 )**

अश्वघोषेण स्वकाव्ययोः बुद्धचरितसौन्दरनन्दयोः जीवनमूल्यानां व्याख्या न केवलं मानववाद-दृष्ट्या कृता अपितु अन्ययोः काव्ययोः मनुष्यस्य भौतिकसांस्कृतिक-धार्मिकनैतिकार्थिकजीवनमूल्यानां सन्दर्भः अपि दत्तः। व्याख्याऽपि एतैः आधारेण कृता। मनुष्यस्य सामाजिका-र्थिकराजनैतिकजीवने नैतिकतायाः स्थानं सर्वोपरि भवति इति सुष्ठुरूपेण प्रतिपादितम्। अत्रैष धर्मः एव मानवजीवनस्य प्रमुखं जीवनमूल्यं भवति।

भारतीयमनीषिणः नैतिकतायाः निरूपणं तत्त्वत्रये सन्दर्भे कुर्वन्तः आत्मा, मनः शरीरञ्च इति तत्त्वत्रयं प्राथम्येन अभजन्ताम्-

**''शरीरमाद्यं खलु धर्मसाधनम्''**

अश्वघोषस्य महाकाव्येषु पमुखतया भगवतः बुद्धात् प्राक् सामाजिकव्यवस्थायाः विवरणं प्रकटितमस्ति। तत्रापि नारीविषयक वर्णनं अतीव विशिष्टं वर्तते। एतेषु काव्येषु मननव्यवहारयोः मूलभूतानि तत्त्वानि प्रतिपादितानि। एतेषु तत्त्वेषु कुत्र-कुत्र जीवनमूल्यानि सन्ति इति स्पष्टतया प्रतीयते मानसिक-एकाग्रतया व्यक्तिः कथम् अभिज्ञां प्राप्तुं शक्नोतीति सौन्दरनन्द-महाकाव्ये सुष्ठुरूपेण उल्लिखितं वर्तते -

**एवं मनोधारणकाक्रमेण,**
**व्यपोह्यकिञ्चित्, समपोह्या किञ्चित्।**
**ध्यानानि चत्वार्यधिगम्य योगी,**
**प्राप्नोत्यभिज्ञा नियमेन पञ्च।।**

**( सौन्दरनन्दम् 01/16 )**

अश्वघोषस्य महाकाव्येषु गौतमबुद्धेन प्रदत्तानि जीवनमूल्यानि विमर्शेण सहितं स्पष्टीकृतानि सन्ति। सत्यं, दुःखं, दुःखस्य प्रतिकारपक्षः, आध्यात्म, योगः, शीलं, राग-शून्यता, परमशान्तिः परमकल्याणकारी धर्मश्च एतानि मूल्यानि विशिष्टरूपेण लिखितानि सन्ति। जीवनस्य न केवलं भौतिकपक्षस्य विषये अपितु प्रज्ञा, विवेकादि अध्यात्मनः, विशिष्ट तत्त्वानां वर्णनं कृतमत्र। गौतमबुद्धेन कुशीनगरस्य शालवने मल्लेभ्यः दत्तमुपदेशं बुद्धचरितम् इति ग्रन्थे इत्थं विवृणोति-

**सर्वेषां हि, ध्रुवो मृत्युर्युगान्तस्थायिनामपि।**
**शोकं व्यक्त्वाऽप्रमत्ताः स्युरितिमेत्यन्तिमं वचः।।**

**( बुद्धचरितम् 26/63 )**

इत्थम् अश्वघोषस्य महाकाव्येषु वर्णितानां जीवन-मूल्यानां विमर्शस्य एतदेव प्रमाणमस्ति यत् भारतीय-संस्कृतेः एतस्याः बौद्धपरम्परायाः प्रचारः प्रसारश्च न केवलं प्राचीनकालतः चीनअफगानिस्तानमध्य एशिया-खोतानकूचीकंबोडियाम्यामारभ्याइलैण्डजापानताईवान-तिब्बतसिंगापुरहांगकांगसुमात्राजावावियतनामसहितं वृहत्तरभारते अभवत् अपितु वर्तमानसमयेऽपि भारतेन

सह विश्वस्य बहवः देशाः मिलित्वा विविधसामाजि-कार्थिकसंगठनानां सांस्कृतिकसंस्थानां (यथा नालन्दा विश्वविद्यालयः) पुनर्स्थापना प्रचलन्ती अस्ति अनेन अनुमीयते यत् अश्वघोषस्य साहित्ये वर्णितानि जीवन-मूल्यानि वर्तमानसन्दर्भे प्रासङ्गिकानि सन्ति।

निस्सन्देहं वक्तुं शक्यते यत् अश्वघोषस्य काव्य-परम्परायाः जीवनमूल्यानि आधुनिक भारतस्य प्रतिष्ठावर्धनं तु कुर्वन्ति एव अनेन सह सामाजिक-स्तरमप्युन्नयन्ति। एका एवं आवश्यकता वर्तते यत् एतेषां ग्रन्थानां अनुशीलनमनवरतरूपेण भवेदेव। अद्य विश्वे अशान्तेः वातावरणं सर्वत्र दृश्यते एतस्याः समस्यायाः निवारणमपि अश्वघोषस्य महाकाव्येषु वर्तते शान्तेः सरलः मार्गः अश्वघोषेण वर्णितायां भारतीय-संस्कृतेः बौद्धपरम्परायां स्पष्टीकृतः अस्ति। एतादृश्या परमशान्त्यैव विश्वकल्याणं सम्भवति।

**इत्यार्थ सत्यानि अवबुध्य बुद्ध्या,**
**चत्वारि सम्यक् प्रतिविध्य चैव।**
**सर्वास्रवान भावनयाऽभिभूय न**
**जायते क्षान्तिमवाप्य भूयः।।**

**( सौन्दरनन्दम् 5/26 )**


**शोधार्थी**
संस्कृतविभागः
जय-नारायण-व्यास-विश्वविद्यालयः,
जोधपुरम्।

राष्ट्रीय विचारों के लिए पढ़ें
पाञ्चजन्य Organiser
हमारी विशेषताएं
- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online through our **Websites: www.panchjanya.com, www.organiser.org**
**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**
**Reach millions of consumers through our weeklies**
**भारत प्रकाशन (दिल्ली) लि.**
2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

संस्कृत-समाचारः

# संस्कृतदिवससमारोहः 17.08.2016 - वृत्तलेखः




संस्कृतशिक्षायाः गौरवपूर्णपरम्परायां श्रावणी-पूर्णिमामुपलक्ष्य प्रतिवर्षं राजस्थानसर्वकारीय निदेशालयः संस्कृत-शिक्षा, राजस्थानम् इत्यस्य पक्षतः संस्कृतदिवसान्तर्गतं विद्वत्सम्मानसमारोहस्य आयोजनं विधीयते। अस्याम् एव परम्परायां 2016 वर्षीय-समारोहः जयपुरस्थ ''बिड़ला ऑडिटोरियम्'' सभागारे 17.08.2016 दिनाङ्के समायोजितः।

गौरवस्यायं विषयो यदस्मिन् समारोहे मुख्यातिथिरूपेण माननीयाः कालीचरणसराफमहोदयाः (संस्कृत-उच्च एवं तकनीकी शिक्षामन्त्रिणः), समारोहाध्यक्षरूपेण प्रोफेसर वासुदेवदेवनानीमहोदयाः (शिक्षाराज्यमन्त्रिणः, स्वतन्त्रप्रभारः), सारस्वतातिथि-रूपेण डॉ. जया दवे (अध्यक्षा, राजस्थान-संस्कृत-अकादमी, जयपुरं) विशिष्टातिथिरूपेण च श्री राजहंस उपाध्यायः (समन्वयकः, स्कूल एवं संस्कृतशिक्षा) मञ्चम् अलङ्कृतवन्तः।

समारोहोऽयं प्रातः 11 वादने समारब्धः। विशिष्टेऽस्मिन् उत्सवे प्रायशः 1500 संस्कृतानुरागिणः समवेताः। अतिथिभिः देव्याः सरस्वत्याः दीपप्रज्वालन-पुरस्सरं वेदमन्त्रैः सह समर्चनं कृतम्। समागतानाम् अतिथीनां वाचिकं स्वागतं प्रमुखशासनसचिवः श्रीसंजयदीक्षितमहोदयः कृतवान्। निदेशकः पुष्पगुच्छप्रदानेन सर्वेषां स्वागतं व्याहृतवान्। अवसरोऽयं विदुषां, प्रवेशिकावरिष्ठोपाध्याय-शास्त्री-आचार्य-परीक्षासु सर्वोच्चाङ्कप्राप्त-कर्तॄणां छात्राणां पुनश्च राजस्थानस्य समेषां विश्वविद्यालयानाम् एम.ए. (संस्कृतं) परीक्षायां सर्वोच्चाङ्कप्राप्तकर्तॄणां छात्राणां सम्मानस्य पुरस्कारस्य च आसीत्।

अत्र अधोलिखिताः विद्वांसः विविधसम्मानैः पुरस्कारैश्च सभाजिताः। यथा हि -



| क्र.सं. | सम्मानः/पुरस्कारः | विद्वांसः/प्रतिभावन्तः | राशिः |
|---|---|---|---|
| 1. | संस्कृतसाधनाशिखरसम्मानः | श्री भानुकुमार शास्त्री, उदयपुरम् | 1,00,000 |
| 2 | संस्कृत-साधना-सम्मानः | 1. प्रो. जगन्नारायण पाण्डेयः, जयपुरम्<br>2. प्रो. (डॉ.) प्रभाकर शास्त्री, जयपुरम्<br>3. पं. शिवचरण शास्त्री, दौसा-जयपुरम् | 51,000<br>51,000<br>51,000 |
| 3 | संस्कृतविद्वत्सम्मानः | 1. पं. श्री रामसहाय शर्मा, टोंक<br>2. डॉ. राकेश शास्त्री, बांसवाड़ा<br>3. डॉ. रामदेव साहू, जयपुरम्<br>4. प्रो. (डॉ.) धर्मचन्द जैनः, जोधपुरम्<br>5. पं. श्री कजोड़मल शास्त्री, जयपुरम्<br>6. श्री उत्तम स्वामी, बांसवाड़ा | 31,000<br>31,000<br>31,000<br>31,000<br>31,000<br>31,000 |
| 4 | संस्कृतयुवप्रतिभापुरस्कारः | 1. डॉ. तगसिंह राजपुरोहितः, जोधपुरम्<br>2. डॉ. शिवचरण शर्मा, जयपुरम्<br>3. कु. प्रतिभाशास्त्री, दौसा<br>4. श्री मुकेशकुमार त्रिवेदी, जयपुरम्<br>5. डॉ. कमलकान्त बालाणः, चूरु<br>6. डॉ. देवेन्द्रकुमार शर्मा, झालावाड़<br>7. श्रीमती अञ्जना शर्मा, जयपुरम् | 21,000<br>21,000<br>21,000<br>21,000<br>21,000<br>21,000<br>21,000 |

एवञ्च विविधपरीक्षासु सर्वोच्चाङ्कप्राप्तकर्तॄणां विद्यार्थिनां कृते सहैव राष्ट्रीय-क्रीडाप्रतियोगितायां भागग्रहीतुः श्रीविनोदशर्मणः कृते चापि प्रशस्तिपत्रेण सह पुरस्कारः प्रदत्तः। कार्यक्रमस्य मुख्यातिथयः श्रीमन्तः कालीचरणसराफमहोदयाः स्वीयप्रेरकमुद्बोधनं कृतवन्तो यत् संस्कृतभाषा विश्वसाहित्यस्य प्राचीनतमा वैज्ञानिकी च भाषा वर्तते। अस्यां सकलजगतः ज्ञानराशिः निहिता वर्तते। संस्कृतविभागे संशोधितविद्यालयीय सेवा-नियमाः प्रकाशितास्सन्ति। एतस्मात् कारणात् दीर्घकालात् प्रतीक्षमाणानां प्रधानाचार्याणां 142 पदेषु पदोन्नतयः कृताः तथा च विभिन्नस्तरेषु पदोन्नतिप्रक्रिया अपि प्रारब्धा भविष्यति। रिक्तपदानां विज्ञापनमपि शीघ्रमेव लोकसेवाऽऽयोगेन प्रकाशयिष्यते। पुनश्च मन्त्रिमहोदयेनोक्तं यद् राजस्थानसर्वकारः संस्कृतशिक्षा-विकासाय कटिबद्धोऽस्ति।

समारोहाध्यक्षः प्रो. वासुदेवदेवनानीमहोदयः सम्बोधितवान् यत् सामान्यशिक्षाविभागे संस्कृतविषयस्य द्वितीयश्रेण्याः 5800 पदानां कृते नियुक्तिः करिष्यते। एतेभ्यः 2295 पदानां विज्ञापनं प्रकाशितम्। शेषपदानां विज्ञापनम् आगामिवर्षे प्रकाशयिष्यते। देवनानीमहोदयः अभाषत यत् संस्कृतभाषा देववाणी अस्ति, इदानीमेषा विज्ञानवाणी भवेदिति प्रयासः करणीयः, यदि वयं मिलित्वा अस्यां निहितां ज्ञानराशिं जनसामान्यसमक्षं प्रस्तौमश्चेन्नूनमेव विश्वगुरुत्वं प्राप्स्यामः।

सारस्वतातिथिः डॉ. जया दवे उक्तवती यत् संस्कृत-वाणी जनवाणी भवेदेतदर्थं संस्कृतभाषायाः व्यवहारे प्रयोगः आवश्यकः। लघु-लघु वाक्यनिर्माणं कृत्वा सरलसंस्कृतेन अस्माभिः सर्वत्र वाग्व्यवहारः कर्त्तव्यः।

इत्थं विद्वत्सम्मानेन सभाजितः श्रीमान् उत्तमस्वामी महोदयोऽपि सर्वेषां कृते कल्याणकामनां कृतवान्। कार्यक्रमस्यान्ते निदेशकमहोदयः श्री विमल कुमार जैनः सर्वेषाम् अतिथीनां, सभाजितानां विदुषां, पुरस्कृतच्छात्राणाञ्च कृते आभारं प्रकटयन् संस्कृतानुरागिणां कृते धन्यवादं ज्ञापितवान्।

कार्यक्रमोऽयं श्रीमतः डॉ. सत्यनारायणशर्म-महोदयस्य संयोजकत्वे श्री रामानुजपाण्डेयमहोदयस्य सह-संयोजकत्वे च साफल्यं प्राप्नोत्। कार्यक्रमस्य सफलसञ्चालनं डॉ. चन्द्रप्रकाशशर्मणा कृतम्। इत्थं गरिमामयोऽयं कार्यक्रमः नैकविदुषां प्रशासकानां जननेतॄणां संस्कृतानुरागिणाञ्चोपस्थितौ सम्पन्नः। एतादृशः विशिष्टकार्यक्रमः संस्कृतगङ्गां प्रवाहयितुं भागीरथप्रयासः भविष्यति।

नारी-स्तम्भः

# गोसेवायै समर्पिता डा. साधनारावमहोदया

❑ डॉ. राजेश्वरी भट्ट

गोसंरक्षणं, गोसंवर्द्धनं, गोपालनञ्च मानवानां परमो धर्मो विद्यते। गोसेवया पापेभ्यो मुक्तिः पुण्यस्य प्राप्तिर्भवति। शास्त्रेभ्यो ज्ञायते यत् गोरक्षायै प्राणोत्सर्गाय तत्परा वसिष्ठो दिलीपोऽन्ये च बहवो महात्मानः गो-प्रसादेन अभीष्टमात्मनः साधितवन्तः। भारतवर्षे गावः मातृवत् पूज्यन्ते। गोपाष्टम्यां तथा अहन्यहनि गोपूजा विधीयते। गावः मानवस्य सुख-समृद्धि-सौभाग्यानां साधिकाः सन्ति। गोभ्यः प्राप्तानि पञ्चगव्यरूपेण दुग्धदधिघृत-गोमूत्र- गोमयादीनि मानवस्य कृते कैंसर मधुमेह राजयक्ष्मा-दिष्वसाध्यरोगेषु अमृततुल्यानि भवति।

कथितञ्च-

अमृतं ह्यव्ययं दिव्यं क्षरन्ति च वहन्ति च।
अमृतायतनाश्चैताः सर्वलोक नमस्कृताः।।

महा. अनु. अ. ५१ श्लो. ३०

किन्तु खेदावहोऽयं विषयो वर्तते यत् नगरेषु, महानगरेषु किमधिकं, ग्रामेषु च निवसतां जनानां कृते गोपालनम् उपेक्षणीयं जातम्। अनेनैव शुद्धदुग्धस्य प्राप्तिः कठिना जाता। सहैव उपभोक्तृ- संस्कृति-समर्थकानां कृते गोपलनापेक्षया कुक्कुर-पालनं समृद्धेः प्रतीकं जातम्। ग्रामेष्वपि रासायनिककृषि साधनानां बाहुल्येन गावः उपेक्षिता जाताः। एवं गते दुर्गतिगता, अशरणा, वृद्धा, बुभुक्षिता गावो मार्गेषु इतस्ततः भ्रमन्त्यो अखाद्य- वस्तूनि खादन्त्यो दृश्यन्ते। रात्रौ जनानां दृष्टिं परिहृत्य वधिकैस्ताः वधस्थले नीयन्ते। गवां दुर्गतिं रोद्धुं सर्वकारः, सहैव नैकाः सामाजिकसंस्था अपि संलग्नाः सन्ति। अस्मिन् प्रसंगे विगतेभ्यः चत्वारिंशत् वर्षेभ्यो गोसंरक्षायै प्राणपणेन समर्पिता शल्य-चिकित्सा-विशेषज्ञा 'डॉ. श्रीमती साधना राव महाभागा' विशेषेण प्रशंसनीया वर्तते। मूलतः कश्मीरप्रदेशवास्तव्या डा. साधनायाः पूर्वजा दीर्घकालेभ्यः तमिलनाडुप्रदेशे निवसन्ति। डा. साधनायाः परिवारः तमिलनाडुप्रदेशे आत्मनः सद्गुणैः बहुश्रुतोऽस्ति। साधनायाः पितामहो गांधिमहोदयस्य सचिवपदे कार्यरत आसीत्। धनं दानाय इति सन्मन्त्रेणाभिमन्त्रितेन साधनायाः परिवारेण ''विनोबा भावे'' महाभागस्य ''भूदानयज्ञे'' चत्वारिंशत् (40) ग्रामाणां भूमिर्दानस्वरूपेण प्रदत्ता। चिकित्सा क्षेत्रे शिक्षां परिसमाप्य डा. साधना अग्रे वैशिष्ट्यं प्राप्तुं विदेशं (ब्रिटेन नगरे) गत्वा शल्यचिकित्सा- विशेषज्ञारूपेण मान्या जाता। यदायदाऽपि साधना अवकाशसमये स्वेदशं आगच्छत् तदा तदा गवां दुर्दशां दृष्ट्वा द्रविताऽभवत्। गवां संरक्षणाय डॉ. साधना विदेशात् सेवामुक्तिं प्राप्य गो-सेवायै संकल्पवती जाता। अनेकशः डा. साधना रात्रिसमये वधस्थलं प्रति नीयमानानां गवां संरक्षणाय 'बुरका' इति यवन-महिलानां परिधानं धृत्वा आरक्षिदलस्य साहाय्येन वधस्थलात् गाः बहिरानीतवती। दुष्टेभ्यो वारं वारं भाययत्यपि डा. साधना मनागपि भयभीता न जाता। गो संरक्षणाय डा. साधना चेन्नईनगरे नीलंगरायनाम्नि नातिविशाले स्थाने षड्गोभिः सह गोशालां स्थापितवती 'इंडिया इंस्टीट्यूट ऑफ एनीमल वेलफेयर' नाम्न्यां गोशालायां डॉ. साधनायाः प्रयासेन परिश्रमेण च सम्प्रति 583 गावः संरक्षणं प्राप्नुवन्ति। कानिचिद् दिनानि पूर्वं नगरवासिनाम् असुविधां विचार्य तेषाम् अनुरोधेन च नगरविकासन्यासस्या-धिकारिणो गोशालायाः-स्थानपरिवर्तनाय आग्रहग्रहिला जाताः। स्थान- परिवर्तनात् गोशालायाः संस्थापिकायाः समक्षम् अनेकाः समस्या उत्थिता जाताः। किन्तु डा. साधनायाः संकल्पेन, समर्पणेन श्रमेण च गोशाला पुनः गोसंरक्षणाय सक्षमा जाता। पश्चिमे वयस्यपि गोसेवाक्षेत्रे राजनीतिं, प्रचारं प्रसिद्धिं च विना निःस्वार्थभावेन गोसेवायै समर्पिता डा. साधना नूनं प्रशंसनीयाऽस्ति।

## हिन्दी अनुवाद

गोसंरक्षण, गोसंवर्द्धन एवं गोपालन मानव का परमधर्म है। गाय की सेवा से घोर पापो से मुक्ति एवं महान पुण्य की प्राप्ति होती है। शास्त्रों से ज्ञात होता है कि गाय की रक्षा के लिए प्राणोत्सर्ग करने के लिए तत्पर वसिष्ठ, दिलीप एवं अन्य बहुत से महापुरूषों ने गाय की सेवा से अपने अभीष्ट को प्राप्त किया। भारतवर्ष में गाय को माता के समान पूजनीय माना गया है। गोपाष्टमी वत्स द्वादशी तथा प्रतिदिन घर-घर में गाय की पूजा की जाती है। गाय मानव की सुख, समृद्धि एवं सौभाग्य की साधिका है। गायों से प्राप्त दुग्ध, दधि, घृत, गोमूत्र एवं गोबर जिसे पञ्चगव्य कहा जाता है वह कैंसर, मधुमेह, क्षयरोग एवं अन्य असाध्य रोगों की मुक्ति के लिए अमृत- तुल्य लाभदायक है। कहा भी गया है :-

**गायें दिव्य अमृतस्वरूप दूध दही आदि का धारण और क्षरण करती है। अतः गायें अमृत की आश्रय एवं नमस्कार के योग्य हैं।**

**महा, अनु. अ. ५१ श्लोक ३०**

किन्तु दुःख है कि वर्तमान में नगरों, महानगरों अधिक क्या कहें गांवों में रहने वाले लोगों को दृष्टि में भी गाय उपेक्षणीय हो गई है। नगरों महानगरों में स्थान के अभाव से एवं नगर विकास न्यास के नियमों के कारण गो संरक्षण कठिन हो गया है। इससे शुद्ध दूध, दही, घी आदि की प्राप्ति कठिन हो गई है। साथ ही उपभोक्तावादी- संस्कृति समर्थकों के लिए गोपालन से अधिक कुत्ता पालन समृद्धि का प्रतीक है। गाँवों में भी रासायनिक कृषि साधनों के बाहुल्य से गायें उपेक्षित हो रही है। इस अवस्था में दुर्गतिप्राप्त, असहाय, बूढ़ी एवं भूखी गायें रास्तों में इधर-उधर भटकती हुई एवं अखाद्य वस्तुऐं खाती हुई दिखाई देती है। रात्रि में कसाई इनको कत्लखाने में ले जाते हैं। गायों की दुर्दशा को रोकने के लिए सरकार एवं जन-सहयोग में रत अनेक सामाजिक संस्थायें कार्य कर रही है। इस प्रसंग में विगत चालीस वर्षों से गो-संरक्षण के लिए प्राणपण से समर्पित शल्यचिकित्सा विशेषज्ञा 'श्रीमती साधना राव' विशेषरूप से प्रशंसनीय है। मूलतः कश्मीर प्रदेश निवासी डा. साधना के पूर्वज लम्बे समय से तमिलनाडु में निवास करते हैं। डा. साधनाराव का परिवार तमिलनाडु में अपने सद्गुणों के कारण अत्यन्त प्रसिद्ध है। इनके दादा महात्मागांधी के सचिव पद पर नियुक्त रहे। धन दान के लिए होता है इस सन्मन्त्र से अभिमंत्रित डा. साधना के परिवार ने विनोबा भावे के भूदान यज्ञ में चालीस गाँवों की भूमि प्रदान की। चिकित्सा शिक्षा सम्पन्न करने के पश्चात् डा. साधना ब्रिटेन जाकर शल्य चिकित्सा विशेषज्ञा के रूप में कार्यरत हो गई। जब-जब अवकाश के समय डा. साधना स्वदेश आती तब गायों की दुर्दशा देखकर अत्यन्त दुःखी हो जाती थी। गायों के संरक्षण के लिए विदेश से सेवा-मुक्ति प्राप्त कर डा. साधना ने गो सेवा का संकल्प लिया। रात्रि के समय वधस्थल की ओर ले जाई जाने वाली गायों की रक्षा के लिए डा. साधना ने मुस्लिम महिलाओं के द्वारा पहिना जाने वाला 'बुरका' पहनकर पुलिस की मदद से अनेक बार गायों को मुक्ति दिलवाई। दुष्टों के द्वारा बार-बार डराए जाने पर भी डा. साधना तनिक भी भयभीत नहीं हुई। गायों के संरक्षण के लिए डा. साधना ने चेन्नई नगर के 'नीलगराय' नामक स्थान पर (छः) गायों के साथ गो शाला की स्थापना की। 'इंडिया इंस्टीट्यूट ऑफ एनीमल वेलफेयर' नाम की इस संस्था में डा. साधना के प्रयास एवं परिश्रम से इस समय 583 गायें हैं, कुछ दिन पूर्व नगर निवासियों की असुविधा के कारण 'नगर विकास न्यास' के अधिकारियों के दृढ़ आग्रह के कारण गोशाला का स्थान परिवर्तन किया गया। जिससे संस्थापिका डा. साधना के समक्ष अनेक समस्याएं उत्पन्न हुई, किन्तु डा. साधना राव के संकल्प, समर्पण एवं श्रम के कारण गोशाला फिर से निर्बाध गति से गो संरक्षण के लिए सक्षम है। वृद्धास्था में भी राजनीति, प्रचार एवं प्रसिद्धि की कामना किए बिना निःस्वार्थ भाव से गो सेवा के लिए समर्पित डा. साधना राव प्रशंसनीय महिला है।

आयुर्वेद-स्तम्भः

# विषमज्वरनाशनाः कषायाः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आचार्यश्चरकः निर्दिशति यत् वर्षर्तौ 'स्थानं भजेदक्लेदि वार्षिकम्।' क्लिन्ने हि स्थाने स्त्रोतोरोधस्य स्त्रोतोदुष्टेश्चाशङ्का भवतीति प्राचीनाचार्याणामभिमतम्। क्लिन्ने हि स्थाने विकृतिकारकाणां कीटानां समुत्पत्तिरपि भवति। तत्र श्वासौच्छ्वासक्रियायां नैर्मल्यं न भवति, त्वचायाः क्लिन्नत्वं दुष्टिरपि च जायते। आधुनिकाः अपि मन्यन्ते यत् क्लिन्ने जलपूरिते च स्थाने विभिन्नाः विकृतिकारकाः कीटाः उत्पद्यन्ते, विशेषेण तु मशकाः समुत्पद्यन्ते। तेषां दंशात् 'मलेरिया' नामकस्य ज्वरस्योत्पत्तिर्भवति।**

आचार्य चरक कहते हैं कि वर्षा ऋतु में क्लेदरहित (सूखे) वर्षाकालिक स्थान का उपयोग (रहने, बैठने आदि में) करना चाहिए। क्लिन्न स्थान का उपयोग करने पर स्त्रोतोरोध की तथा स्त्रोतोदुष्टि की आशङ्का बनी रहती है, यह प्राचीन आचार्यों का अभिमत है। क्लिन्न (गीले) स्थान में विकृति करने वाले कीटों की भी उत्पत्ति होती है। वहाँ श्वासोच्छ्वास क्रिया में निर्मलता नहीं होती है, त्वचा में चिपचिपाहट और दुष्टि भी उत्पन्न होती है। आधुनिक भी मानते हैं कि गीले (नमीवाले स्थान) और जल भरे हुए स्थान में विकृतिकारक विभिन्न कीट उत्पन्न होते हैं, विशेष रूप से तो मच्छर उत्पन्न होते हैं। उनके काटने से 'मलेरिया' नामक ज्वर की उत्पत्ति होती है।

**आयुर्वेदेऽपि विषमज्वरस्य विशिष्टं वर्णनं विद्यते। अस्य पञ्चभेदाः भवन्ति। मलेरियानामको ज्वरोऽयमतीव सन्निकटो वर्तते विषमज्वरस्य। सन्तत-सतताऽन्येद्युस्तृतीयकचतुर्थकात्मकाः ह्येते पञ्चविधाः ज्वराः विषमज्वरसंज्ञकाः विषमवेगत्वेन भवन्ति। एतेषां ज्वराणां विषमत्वं विषमकालत्वेन च भवति। विषमकालत्वं तु पञ्चसु ज्वरेषु भिन्न-भिन्नरूपेण भवति। सामान्यतया त्वेषां ज्वराणां स्थितिस्त्वेतादृशी भवति यदेते पूर्वमुत्पद्यन्ते पश्चाच्च स्वयमेव विसर्गत्वमवाप्नुवन्ति। विसर्गानन्तरं नियते हि काल एतेषामागमनं स्वत एव भवति। एतदेव ह्येतेषां विषमवेगत्वं वर्तते। यः निरन्तरो ज्वरो भवति सोऽविसर्गी भवति, यः विसर्गतामवाप्य पुनरुत्पद्यते सः विसर्गी ज्वरः भवति। एतदेव ह्यस्य विषमत्वम्।**

आयुर्वेद में भी विषमज्वर का विशिष्ट वर्णन है। इसके पाँच भेद होते हैं। मलेरिया नाम का यह ज्वर विषम ज्वर के अत्यन्त निकट होता है। सन्तत, सतत, अन्येद्यु, तृतीयक और चतुर्थक स्वरूप वाले ये पाँच प्रकार के ज्वर विषम ज्वर संज्ञावाले होते हैं। इन ज्वरों का विषमत्व विषम वेग और विषम काल के कारण होता है। विषमकालत्व तो पाँचों ज्वरों में भिन्न-भिन्न प्रकार से होता है। सामान्यतया तो इन ज्वरों की स्थिति ऐसी होती है कि ये पहले उत्पन्न होते हैं और बाद में विसर्ग को प्राप्त हो जाते हैं (छूट जाते हैं, ज्वर उतर जाता है)। विसर्ग के बाद में नियत समय पर इनका आगमन स्वतः ही होता है। यही इनका, विषमवेगत्व है। जो ज्वर लगातार होता है वह अविसर्गी होता है। जो विसर्गता को प्राप्त कर पुनः उत्पन्न होता है वह विसर्गी ज्वर होता है। यही इसका विषमत्व है।

**आचार्यश्चरकोऽस्य विसर्गे समुत्पत्तौ च यत्कारणं भवति तन्निष्पादयति, यथा-**

**कृत्वा वेगं गतबलाः स्वे स्वे स्थाने व्यवस्थिताः।**
**पुनर्विवृद्धाः स्वे काले ज्वरयन्ति नरं मलाः॥**

**(च.चि. 3/70)**

**सततकादिषु चतुर्षु ज्वरेषु दोषाः वेगं कृत्वा गतबला भवन्ति, गतबलाश्च पुनः स्वे स्वे रक्तादौ स्थाने स्थिता भवन्ति। पुनस्त एव वृद्धाः स्वे काले ज्वरयन्ति। सन्ततनामके प्रथमे विषमज्वरे तु द्वादशाहविसर्गेण त्रयोदशाहे पुनरनुबन्धात् कालवैषम्यमस्ति, तेन सोऽपि विषमः। अन्यथा सन्ततस्तु निरन्तरमेव द्वादशाहपर्यन्तं स्थितो भवति। एषः पञ्चविधो ज्वरः प्रायशः सन्निपातेन दृष्टः। ज्वरेऽस्मिन् दोषाणामनुबन्धः पश्चाद्भवति, पूर्वं तु आगन्तुकारणेनोत्पद्यत एषः ज्वरः। आचार्यः कथयति**

**यद् 'आगन्तुरनुबन्धो हि प्रायशो विषमज्वरे।' अत्र कुत्रापि नोक्तं यदागन्तोरनुबन्धो हि कीदृग्विधो भवति।**

इसके विसर्ग और उत्पत्ति में जो कारण होता है उसे आचार्य चरक बताते हैं कि-

दोष वेग को उत्पन्न करके दुर्बल (बलहीन) हो कर अपने-अपने स्थान में व्यवस्थित हो जाते हैं, अपने अनुकूल काल में पुनः बढ़ कर (वृद्ध होकर) मनुष्य को ज्वर से आक्रान्त करते हैं अर्थात् पुनः ज्वर उत्पन्न करते हैं।

सततकादि चारों ज्वरों में दोष वेग को करके गतबल (दुर्बल) हो जाते हैं, बलरहित वे पुनः अपने-अपने रक्तादि स्थानों में स्थित हो जाते हैं। पुनः वे ही बढ़े हुए दोष अपने समय पर ज्वर उत्पन्न करते हैं। सन्तत नाम के प्रथम विषमज्वर में तो बारहवें दिन विसर्ग (ज्वरयुक्त) होने से तथा तेरहवें दिन पुनः इस ज्वर का अनुबन्धन होने से (उत्पन्न होने से) कालवैषम्य हो जाता है, अतः वह भी विषम ही है। अन्यथा सन्ततज्वर तो निरन्तर ही बारह दिन पर्यन्त बना रहता है (बारहवें दिन ही विसर्ग होता है)। यह पाँच प्रकार का ज्वर प्रायः सन्निपात (वातादि तीनों दोषों) से देखा गया है (होता है)। इस ज्वर में दोषों का अनुबन्ध (जुड़ाव) बाद में होता है, पहले तो यह ज्वर आगन्तु कारण से उत्पन्न होता है। आचार्य कहते हैं कि विषमज्वर में प्रायः आगन्तु अनुबन्ध रूप में रहता है। यहाँ कहीं भी नहीं कहा गया है कि आगन्तु का अनुबन्ध किस प्रकार का होता है।

**आगन्तुज्वरोत्पत्तिप्रसङ्गे चरकाचार्येण यत्राभिषङ्गजः प्रोक्तस्तत्र स्पष्टं कृतं यद् 'विषवृक्षानिल-संस्पर्शात् तथाऽन्यैर्विषसम्भवैः।' कथनेनानेन स्पष्टं भवति यदन्यैरपि विषैरभिषङ्गजो ज्वरो भवति। वर्तमानकालेऽनुसन्धानादिभिः स्पष्टं जातं यन्मशकदं-शेनोत्सृष्टेन विषेण रक्ते विकृतिर्भूत्वा ज्वरोत्पत्ति-र्भवति। स ज्वरः 'मलेरिया' नाम्ना ख्यातः। एष एव हि प्राचीनाचार्यैर्निदिष्टः विषमज्वरो वर्तते। अत्र विषमज्वरस्य मलेरियानामकस्य च ज्वरस्य साम्यापादनमुद्देश्यं न वर्तते। किन्तु विषमज्वर आचार्येण ये कषायाः प्रोक्ताः ते मलेरियानामकस्य ज्वरस्यापि विनाशना भवन्ति। अत्र केषाञ्चित्कषायाणा मुल्लेखः क्रियते येषां प्रयोगेण जनः यद्येकस्यापि कस्यापि कषायस्य प्रयोगं करोति तदा सः विषमज्वरेण ग्रस्तो न भवति।**

आगन्तुज्वर की उत्पत्ति के प्रसङ्ग में जहाँ पर आचार्य चरक ने अभिषङ्गज ज्वर कहा है वहाँ स्पष्ट किया है कि 'विषवृक्ष के संस्पर्श से तथा विषमरक्त वायु के संस्पर्श से तथा अन्य विष के हेतुओं से अभियुक्त के (संलग्न होने वाले के) अभिषङ्गज ज्वर होता है ऐसा कुछ आचार्य कहते है।' इन कथन से स्पष्ट होता है कि अन्य विषों से भी अभिषङ्गज ज्वर होता है। वर्तमान काल में अनुसन्धान आदि से स्पष्ट हो गया है कि मच्छर के काटने से उत्सृष्ट (छोड़े गए) विष से रक्त में विकृति हो कर ज्वर की उत्पत्ति होती है। वह ज्वर 'मलेरिया' नाम से प्रसिद्ध है। यही प्राचीन आचार्यो के द्वारा निर्दिष्ट विषमज्वर है। यहाँ विषम ज्वर और मलेरिया में समानता बताना उद्देश्य नहीं है, किन्तु विषम ज्वर में आचार्य ने जो कषाय कहे हैं वे मलेरिया नाम के ज्वर को भी नष्ट करने वाले होते हैं। यहाँ कुछ कषायों का उल्लेख किया जा रहा है जिनके प्रयोग से विषमज्वर से ग्रस्त व्यक्ति ज्वरमुक्त होता है। स्वस्थ व्यक्ति यदि किसी एक कषाय का भी प्रयोग करता है तो वह विषमज्वर (या मलेरिया) से पीडित नहीं होता है।

**पिप्पल्यादि-कषायः-**

**पिप्पल्यश्चन्दनमुशीरं कटुरोहिणी सारिवा कलि-ङ्गकास्तामलकी स्थिराऽतिविषा द्राक्षामलकबिल्वानि त्रायमाणा निदिग्धिका द्रव्यैरतैर्विनिर्मितं कषायं पीत्वा जनः जीर्णज्वरेण विषमज्वरेण च विनिर्मुक्तो भवति। कषायोऽयं क्षयं कासं शिरःशूलं पार्श्वशूलं हलीमकं विषमाग्निमंसाभितापञ्च संनियच्छति। जीर्णज्वरे चिकित्सकास्त्वनेन कषायेण सुसिद्धं घृतमपि रुग्णाय ददति।**

**कलिङ्गकादि-कषायः-**

**कलिङ्गकान् पटोलस्य पत्राणि कटुरोहिणीं च सममात्रया गृहीत्वा सम्मिलितस्यास्य कषायस्य विंशतिग्राममात्रायां ग्रहणं कृत्वा विधिपूर्वकं क्वाथं विनिर्माय प्रातः सायं विधिपूर्वकं पातव्यमनेन**

**विषमज्वरस्य निरसनं भवति।**

**पिप्पल्यादि कषायः-**

पिप्पली, चन्दन, खस, कुटकी, सारिवा, इन्द्रजौ, भूमि आँवला, सरिवन, अतीस, मुनक्का, आँवला, बिल्व, त्रायमाणा, बडी कटेरी इन द्रव्यों से बनाया गया काढा पी कर व्यक्ति जीर्णज्वर से और विषम ज्वर से मुक्त होता है। यह कषाय क्षय, कास, शिरःशूल, पार्श्वशूल, हलीमक (जीर्णतीव्र पीलिया) विषमाग्नि और कन्धे की जलन या ताप को नियन्त्रित करता है (सम करता है)। जीर्णज्वर में चिकित्सक इस काढे से सिद्ध (या इन द्रव्यों के कल्क से सिद्ध) घृत को भी रोगी को देते हैं।

**कलिङ्गकादि कषाय -**

इन्द्र जौ, परवल के पत्ते और कुटकी इनको समान मात्रा में लेकर मिले हुए इस काढे को 20 ग्राम की मात्रा में लेकर विधिपूर्वक क्वाथ बनाकर सुबह और शाम को विधिपूर्वक पिलाना चाहिए, इससे विषम ज्वर दूर होता है।

**पटीलादिकषायः-**

**पटोलपत्राणि सारिवां मुस्तं पाठां कटुरोहिणीञ्च गृहीत्वा विधिपूर्वकः क्वाथो विधेयः। अस्य पानेन ज्वरशान्तिर्भवति, विशेषेण तु विषमज्वरस्य।**

**निम्बादिकषायः-**

**निम्बं, पटोलपत्राणि त्रिफलां मृद्वीकां मुस्तं वत्सकं सममात्रायां गृहीत्वा विनिर्मितः पीतश्च क्वाथः विषमज्वरं नियन्त्रयति।**

**किराततिक्तादिक्वाथः-**

**किराततिक्तं चन्दनममृतां शुण्ठीञ्चैतत् प्रत्येकं द्रव्यं पञ्चग्राममात्रायां (अमृतां द्विगुणां) गृहीत्वा समुत्क्वाथ्य पानेन विषमज्वरस्य शमनं भवति।**

**गुडूच्यादिक्वाथः-**

**गूडूचीमार्द्रामेव 20 ग्रामपरिमितां गृहीत्वा तत्र ग्रामपञ्चात्मकमामलकं तावन्मानमेव च मुस्तं सम्मेल्य चतुः शत मिलिलिटरपरिमिते जले प्रक्षिप्य किञ्चित्कालं (घण्टात्रयपरिमितं) प्रतीक्ष्याग्नौ विधिपूर्वकं क्वाथनिर्माणं विधेयम्। अष्टमांशावशिष्ट-स्यास्य सुसिद्धस्य पूतस्य क्वाथस्य पानेन विषमज्वरस्यागमनं न भवति। अत्र दशसंख्यकानि द्राक्षाफलान्यपि चापोथ्य क्वाथनिर्माणकाले सर्वेषां प्रक्षेपो विधेयः। सर्वेषां ज्वराणां नाशकोऽयं कषायः विशेषेण तु विषमज्वरस्य रोधको भवति, विबन्धञ्चापि भिनत्ति। अग्निविवर्धकोऽयं कषायः दाहनिवारकोऽपि विद्यते।**

**पटोलादि कषाय-**

परवल के पत्ते, सारिवा, नागरमोथा, पाठा और कुटकी को (समान मात्रा में) लेकर विधिपूर्वक क्वाथ बनाना चाहिए। इसके पीने से ज्वर शान्त होता है, विशेष रूप से विषमज्वर शान्त होता है।

**निम्बादि कषाय -**

नीम की छाल, परवल के पत्ते, त्रिफला, मुनक्का, नागरमोथा और कुटज ये सब समान मात्रा में लेकर बनाया गया तथा पीया गया क्वाथ विषमज्वर को नियन्त्रित करता है।

**किराततिक्तादि क्वाथ-**

चिरायता, लालचन्दन, ताजा गिलोय और सोंठ यह प्रत्येक द्रव्य पाँच ग्राम (गिलोय दो गुनी) की मात्रा में लेकर क्वाथ बना कर पीने से विषमज्वर का शमन होता है।


**गुडूच्यादिक्वाथ-**

गीली गिलोय को 20 ग्राम की मात्रा में लेकर उसमें पाँच ग्राम ऑवला और उतनी ही मात्रा में नागरमोथा मिलाकर 400 मि. लि. जल में डालकर कुछ समय (3 घण्टे) तक प्रतीक्षा करके अग्नि पर विधिपूर्वक क्वाथ का निर्माण करना चाहिए। अष्टमांश (50 मि.लि.) अवशिष्ट इस सिद्ध छाने हुए काढ़े के पीने से विषमज्वर का आगमन नहीं होता है। इसमें दस संख्या में मुनक्का भी कूट कर (कुचलकर) क्वाथ के बनाते समय ही (या भिगोते समय ही) डाल देनी चाहिए। सभी ज्वरों का नाश करने वाला यह कषाय विशेषरूप से तो विषमज्वर को रोकने वाला होता है और विबन्ध (कब्ज) को भी दूर करता है। जा ठराग्नि को बढ़ाने वाला यह कषाय दाहनिवारक भी होता है।

**80, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

सत्यमेव जयते
राजस्थान सरकार

# प्रगति के पंखों से नई बुलंदियों की ओर...

सभी प्रदेशवासियों को
70वें स्वतंत्रता दिवस की
हार्दिक शुभकामनाएं



वसुन्धरा राजे
मुख्यमंत्री, राजस्थान

राजस्थान संवाद

सूचना एवं जनसम्पर्क विभाग, राजस्थान सरकार


स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,